८१२३
२
...कर
...नो
...नं.
...नं. २२१

श्री आदिनाथाय नमः

卐

# श्री कमललब्धि महोदय काव्यम्

卐

प्रकाशक

शा. लक्ष्मीचंदजी आसकरण.

श्री आदिनाथाय नमः ।

आचार्यमहाराज श्रीमद् विजयानंद

सूरीश्वर पादपद्मेभ्यो नमः ।

# श्री कमललब्धि महोदय काव्यम्

संयोजक

प० व्रजनाथ [illegible]

प्रकाशकः

फलवृद्धि वास्तव्यो

आसकरणात्मजः कोचर लक्ष्मीचंदः

हु० वा० दे० उपधानज्ञानद्रव्येण.

प्रतयः ५००. आवृत्तिः प्रथमा.

वि. सं० १९९१. वी. सं० २४६१.

मूल्यम्

वाचनं मननं पठनञ्च.

पालीताणा—श्री बहादुरसिंहजी प्रीं. प्रेसमां
शा. अमरचंद बहेचरदासे छाप्युं.

ન્યાયાંભોનિધિ જૈનાચાર્ય શ્રીમદ્ વિજયાનંદ
સૂરીશ્વરજી (આત્મારામજી) મહારાજના
અનન્ય પટ્ટ પ્રભાવક—



સદ્ધર્મરક્ષક જૈનાચાર્ય શ્રીમદ્—
વિજયકમળસૂરીશ્વરજી મહારાજ.

બી. પી. પ્રેસ—પાલીતાણા.

# प्रस्तावना.

अयि मान्याः सहृदयाः

असारेऽस्मिन् संसारे बम्भ्रम्यमाणानां प्राणिगणानां अनुपमोत्तममहात्मनां पवित्रं जीवनचरित्रं आत्मनः सत्तमगुणावाप्तये विकासाय च समीचीनं साधनमिति निर्विवादमेव। अत एव हि महात्मनां जीवनचरित्रोल्लेखनप्रणाली चिरत्नसमयादेव प्रचलिता दरीदृश्यते। अमूमेव प्रणालीं शिवङ्करामनुसरन् पुस्तकेऽस्मिन्ननेकछन्दालङ्कारालङ्कृतश्लोकरूपेण आचार्यवर्यश्रीमद्विजयानन्दसूरीश्वराणां करुणावारपारीणानां जगज्जेगीय्यमानयशसां अनन्यपट्टालङ्कृतानां, **श्रीमद्विजय कमलसूरीश्वराणां** एतत्पट्टप्रदीपकानां **श्रीमद्विजयलब्धिसूरीश्वराणां** च लघुतया सारांशभूतं जीवनचरित्रं विलेखितुमुत्सहे॥

सम्प्रति प्रत्नसमयस्थानां महात्मनां साकल्येन जीवनादन्तस्यानुपलम्भादैतिहासिकानां सज्जनानां महानेव खेदः, नितरां प्रयत्नेऽनुष्ठीयमानेऽपि साकल्येन परिप्राप्तिर्दुःशका च। अत एवाग्रे एतेषां परिश्रमो न स्यादिति विभाव्य महीयसां समकालिकेन भक्तवर्गेणतेषां पूतस्य जीवनचरित्रस्य आद्यन्तमुट्टङ्कनमनिवार्यं कार्यमेव। महीयसां पुरुषाणां हि गुणानुवर्णनं कर्म-

मलक्षालनाय भवति। भवति च परम्परया विकासादात्मनः परमपदप्राप्तये ॥

ग्रन्थेऽस्मिन् प्राधान्येन चरित्रनेतुर्जन्मस्थानं, संसारवैराग्यं, नैस्पृह्यं, अप्रमत्तता, निर्भयत्वं, कर्तव्यपरायणता, रत्नत्रयस्य अनुपमाराधकत्वं, शासनदृढानुरागः, अनेकेभ्यो धरणिपतिभ्यः धर्मोपदेशः इत्याद्यपूर्वगुणवर्णनं क्रमेण सरसप्रणाल्या उपनिबद्धम्। उभयोर्महात्मनो र्यावदुपलब्धा प्रवृत्तिः तावत्येव प्रकाशिता ॥

काव्यमदः श्रीकमललब्धिमहोदयनामकं पठित्वा सज्जना हंस इव सद्गुणान् परिगृह्य सुखिता भवन्त्विति सादरमभ्यर्थ्य विरम्यते—

निवेदकेन—

पं० नारायणाचार्येण

न्यायाचार्येण.

# शुद्धिपत्रकम्.

| अशुद्ध. | शुद्ध. | पृष्ठ. | पंक्ति. |
|---|---|---|---|
| सारसा | सरसा | २ | १ |
| त्रां | सूत्रां | ४ | ४ |
| थथा | यथा | ५ | ५ |
| भब | भव | ६ | १३ |
| भूसुरम् | सद्गुरुम् | ८ | १४ |
| पापं | पाथं | १० | १० |
| तड | तम | १४ | १ |
| पत्तं | प्रत्तं | १४ | १४ |
| सर्वं | सर्वान् | ४३ | १ |
| राज्ञ्यः | राज्ञ्याः | ४५ | ८ |
| भावांबोधे | भवाम्भोधे | ५१ | ५ |
| मुनी | मनी | ५३ | १० |
| माहो | माहा | ५५ | ३ |
| रिसूरय | सूरिसूरयः | ५ | ६ |
| जंतून् | जन्तून् | ५९ | ९ |
| वशा | वशी | ६२ | १० |
| मृष्ट | मिष्ट | ७० | ५ |
| पतनं | पत्तनं | ७० | ११ |
| गण्य | ग्रगण्य | ७६ | १४ |

| अशुद्ध. | शुद्ध. | पृष्ठ. | पंक्ति. |
|---|---|---|---|
| विरागसं | निरागसं | ८७ | १२ |
| सभाभि | समाभि | ९२ | १३ |
| चत्रे | चक्रे | ९४ | २ |
| दंव्य | द्रय | १०९ | ५ |
| मेसौ | मसौ | १११ | १५ |
| तद्र्मे | तद्धर्मे | ३ | १२ |
| परिस्वण्डय | परिखण्डय | २४ | ५ |
| गहादेश | ग्रहादेश | ४४ | ६ |
| सोढं | सोढुं | ५२ | ४ |
| मुरव्यत्त्व | साहाय्य | ६५ | १४ |
| वोद्भुत | वोद्भूत | ९२ | १७ |
| सूरेऽम | सूरेर्म | १०६ | १५ |
| सुरीशा | सूरीशा | १११ | ११ |

श्री शत्रुञ्जयाय नमः ।

सुविहित शिरोमणि तपगच्छाधीश न्यायाम्भोनिधि

श्री विजयानन्द सूरीश्वरपादपद्मेभ्यो नमः ।

# सुद्धर्मरक्षक आचार्यमहाराज श्रीमद्विजय कमलसूरीश्वरस्य संस्कृतपद्यमयं

# संक्षिप्त जीवन चरित्रम्

शार्दूल०

भास्वत्पूर्णहिमांशुकान्तवदनं देवद्रुपुष्पार्चितं
व्याकोच्यम्बुजपत्रपंक्ति सुषमाधिक्कारदृक्षणम् ॥
उद्भास्वन्नखचन्द्रखण्डरुचिरं श्रीवीरतीर्थङ्करं
नत्वैतच्चरितं शिवं कमलसूरीन्द्रस्य कुर्वे मुदा ॥१॥

स्रग्धरा०

धर्मक्षेत्रे वरिष्ठे विलसति मनुजा-
नन्दसन्दोहदेषु पांचालेषु प्रशस्ता

हसित सुरपुरश्रीः पुरी सारसेति ।
यस्यां भास्वद्दिव स्पृग्गृहखचितमणि-
श्रेणिघस्रायमाणां रात्रिं जानन्ति लोका
अभिहतघटिकाधीरनादेन चित्ते ॥२॥

केचिद्वस्त्रान्नदानैरनुदिनमसकृत्
याचकान्प्रीणयन्तः केचित्पुष्पोपहारैः
करतलकलितैर्देवपूजासु सक्ताः ।
केचित्साधून्प्रवीणान्परहितकरणे
साधु शुश्रूयन्तः वर्तन्ते यत्र केचित्
प्रवचनपटवः श्रावयन्तश्च धर्मान् ॥३॥

मालिनी०

रुचिरसुगुणसान्द्रः रुच्यभाषोरगेन्द्रः
विमतनगमहेन्द्रः साधुभक्तावतन्द्रः ।
चतुरकुमुदचन्द्रः गौरुवंशोरुचन्द्रः
दिनमणिरिव यस्यां राजते रूपचन्द्रः ॥४॥

शिखरिणी०

सतीसंसच्छ्रेष्ठा पतिबहुमता चन्द्रवदना
समस्ताः कुर्वाणा वदनमहसाशा वितिमिराः
विजेत्री सक्थिभ्यां करिवरकरं तस्य वनिता
सुशिला जीताऽऽसीद्रतिरिव रतीशस्य विमला ॥५॥

गीति०

नेत्रं कुवलयमित्रं गात्रं कुसुमास्त्रकरकनकवेत्रम् ।
मध्यस्त्वनुमितिसाध्यः चेतोहृद्यं कुचद्वयं यस्याः ॥६॥

मालिनी०

नगगगननवह्मासंमिते वैक्रमेऽब्दे
शुभनिलयविराजत्खेचरेन्द्रे विलग्ने ।
उदयगिरिशिखायाः पद्मबंधुर्यथाऽस्याः
अजनि भुवनबंधुः कोऽपि पुण्येन तस्य ॥७॥

शिखरिणी०

रमन्तेऽस्मिन्सर्वे कलितनिखिलांशस्य शशिनः
मुखाम्भोजं बिभ्रत्यखिलगुणलुण्ठत् गुणनिधौ ।

परं पारं प्राप्तुं भवजलनिधेः काङ्क्षिण इति
व्यधान्नाम्ना रामं मुदितजनको बालसहितम् ॥८॥

वसन्त०

लालाम्बुबिन्दुनिकरैर्धृतरंध्र ब्राम्
नीलालकाकलितमञ्जुलवक्त्रपद्मः ।
लीलास्मितैरधरमूलयुगाद्गलद्भिः
मालां दधौ स हृदये खलु मौक्तिकानाम् ॥९॥

मालिनी०

बहुविधशिशुलीलामाचरन्बालकोऽसौ
जनकरचितयत्नादाप वृद्धिं क्रमेण ।
धरणिधरचलद्भ्यो निर्झरेभ्यो बहुभ्यः
सरिदिव तरलोर्मिश्रेणिभिः सुप्रसन्ना ॥१०॥

उप०

ज्योतिर्विदं प्राप धनिप्रशस्यम्
किशोरचन्द्रं यतिवर्गवृद्धम् ।

सौहार्दनुन्नस्य पितुर्निदेशात्
षष्ठेऽथ वर्षे विनयी कुमारः ॥११॥

उपेन्द्र०

यतीन्द्रवाचा मतिमान्कुमारो
लिपिं यथावत्परिचिन्त्य वाङ्मयम्
सरित्पतिं व्यूह इवाम्बुचारिणाम्
अवीविशत् द्विपवतीमुखेन ॥१२॥
अयं यतीन्द्रं धिषणाप्रभावात्
अतोषयत्तं दिवसैस्तु कैश्चित् ।
तस्मात्समासादितकोशभारो
निनाय नेत्रेन्दुसमाः सुखेन ॥१३॥

अनुष्टुप्०

पूर्वपुण्यप्रभावेण मतिमान्विनयोज्ज्वलः ।
भुवनं लक्षयित्वा सः मनस्येवं व्यचिन्तयत् ॥१४॥

शिखरिणी०

अमी सर्वे सत्वाः नहि बहुलकालस्थितिजुषः
निमेषाज्जायन्ते विलयमपि यान्ति क्षणममी ।

अतः कोवा सङ्गः सुतपितृकलत्रादिषु कवेः
विरागे सङ्गः स्याज्जिनवचनपीयूषविषये ॥१५॥

बृहच्छोको लोकः कुवलयदृशः सर्पसदृशः
श्रियो विद्युल्लोला महदपि धनं भूरि निधनम् ।
विपन्मूर्त्तिर्मूर्त्तिः विषयजरसाः प्रान्तविरसाः
विचार्यैवं चक्रे स मनसि वरं संयमस्मृतिः ॥१६॥

उप०

ततस्स संतापकृशानुतप्तो
यतीन्द्रपादाम्बुजमभ्युपेत्य ।
पवित्रचारित्रतरिं ययाचे
संसारपाथोनिधिपारगामी ॥१७॥

वैतालीयं०

भवशुष्मविलुप्तमानसं
शरणाकांक्षिणमेनमागतम्
प्रशमाभरणो यतीश्वरो
गिरमूचेऽमृतसंमिताक्षराम् ॥१८॥

वसन्त०

रत्नाकरे करतलात्पतिता मणीव
लोके नरत्वमपि दुर्लभमित्यवेहि ।
आसाद्य तन्नहि निवृत्त्युचितं कृतं चेत्
किं तेन जीवनभृता पशुसन्निभेन ॥१९॥

संसार भीषणवने कुसुमेषु गर्ते
मायालतापरिवृते ममता मृगेन्द्रे ।
अज्ञानगाढतिमिरे मदगोत्रदुर्गे
चेतो न चालय कदापि सुचारु बुद्धे ॥२०॥

उपेन्द्र०

इति प्रगल्भं वचनं महात्मनो
निशम्य संसारनिवृत्तिमिच्छते ।
त्रयोदशाब्दाय ददौ यतीश्वरो
यतिप्रसिद्धं शुभदायि संयमम् ॥२१॥

वैतालीयं०

अधिगम्य स संयमश्रियं
शुशुभे शारद चन्द्रमा इव ।

प्रतिपद्य दिवाकृता द्युतिं
निहितां सायमिवाशुशुक्षणिः ॥२२॥

भुजङ्ग०

जिनेन्द्रेषु सक्तिर्न पापे कदापि
गुरोः पर्युपास्तिर्न कामादिशत्रोः ।
विरागे मतिर्यस्य न क्वापि रागे
स एवं महात्मा नवाब्दान् व्यनैषीत् ॥२३॥

मालिनो०

नवतरुणिमलक्ष्मीनन्दनीयं विभासम्
विनयविरतिरत्नैः शेमुषीशाणशीर्णैः ।
जनततिरिति मेने मोहनाय त्रिलोक्याः
वपुरिदमवलोक्याकृतिमित्थं सुमेषुः ॥२४॥

शार्दूल०

काव्यालङ्कृतितर्कवाङ्मयमहागम्भीरपाथोनिधिम्
सर्वैर्बुद्धिगुणैरुदारचरितो वाचां निधिं सद्गुरम् ।

संसेऽथाथ दिगर्णवं पवनजिद्रविहैर्विवशान्यथा
गाम्भीर्यादिगुणोज्ज्वलोऽयमतरत्स्वल्पेषु वर्षेषु हि

पृथ्वी०

धनार्जनविचिन्तनं हृदयरोपिताशावनम्
वृथा चरणशातनं खलकदर्यसंसेवनम् ।
सदा व्यसनशोचनं प्रियवियोगदीनाननम्
ह्यतीतजिनशासनं यतिमतं न मे रोचते

मालिनो०

अहह सहजमोहे माविलासप्रपञ्चे
हृदयमतिनिमग्नं त्यागिनाम्नाममीषाम् ।
तदहमिह विहर्तुं पङ्किले चेद्यतिष्ये
स्वहितमहितकृत्यान्नूनमावर्जितः स्याम्

वसन्त०

इत्थं विचिन्त्य मतिमान्स विहृत्य तस्मात्
जीरापुरं धनिगणैर्बहुधा परीतम् ।

असाद्य वै विसनचन्द्रपदाब्जशोत
छायासुखं सुरुचिरं चिरमन्वभूच्च ॥२८॥

शार्दूल०

आत्मारामसुनीशसुन्दरकृपानीरोर्मिसंक्षालित-
स्वान्तस्यास्य मुनेर्जिनप्रतिकृतौ श्रद्धा प्रवृद्धाऽभवत् ।
एतं स्थानकवासिवृन्दममलाध्वानं निनीषुः परम्
तद्द्वेषोद्वहनेन तानुपदिशन्तत्र न्यवात्सीदसौ ॥२९॥

व्यामोहप्रसरावरोधनविधौ दक्षाः विशुद्धाः कथाः
पीयूषप्रसराः श्रुतेर्हितकराः वैराग्यभावोज्ज्वलाः ।
पायं पायमसौ दयादमशमाम्भोधेर्गुरोराननात्
चातुर्मास्यमनीनयद्द्रुततरं मोदेन रामस्सुधीः ॥३०॥

मालिनी०

तदनु विसनचन्द्रः प्रार्थितः संयमाय
प्रणतिविनतिपूर्णं रामबालेन भूयः ।
शुभदिनमनुचिन्त्य स्फारशृङ्गारपूर्णं
महितमहमवाक्षीत् श्रावकान्संविधातुम् ॥

पञ्चचामर०

ध्वनन्मृदङ्गकाहलैः प्रवृत्तकीर्तिपाठकैः
प्रकृष्टसेवकव्रजैः प्रहृष्टभक्तमण्डलैः ।
मुनीन्द्रवृन्दमण्डितः पुरस्थितैरधिष्ठितः
चषालचारुचर्चितः तदीयसंयमोत्सवः ।३२।

मालिनी०

मधुपविवृतकुम्भे न्यस्तसिन्दूररेणौ
कनककलितघण्टे किंकिणीशोभिकण्ठे ।
श्रवणयुगलचञ्चच्चामरे मेघतुल्ये
मदकलकरिपृष्ठे भ्राजते रामलालः ॥३३॥
धवलकुसुमभास्वद्वस्त्रकस्योपरिष्टात्
कनकमणिविभूषाः भूषयन्ति स्म देहम् ।
वहुधनपरिपूर्णात्पात्रतो याचकान्सः
प्रचलति करिपृष्ठं राजयन्प्रीणयंश्च ॥३४॥

शार्दूल०

प्रव्रज्योचितसाधनेद्धकनकस्थालीसमुद्भासिताः
पीनोत्तुङ्गपयोधराः परिलसत्संपूर्णचन्द्राननाः ।

लीलाविभ्रममत्तमन्दगतिभिर्नागेन्द्रगर्वच्छिदः
गायन्त्यो व्यचरंस्त्रियः श्रुतिसुखं तस्मिन्महत्युत्सवे

मालिनी०

नवविमल दुकूले पात्रकं धर्मकेतुम्
पुनरपि मुखपट्टीं शुद्धमप्यूर्णवस्त्रम् ।
गुरुजनपरिदत्तं प्राप्य रामो दिदीपे
नलिनमिव नितान्तं तिग्मरश्मेर्मयूखान्

उप०

इत्थं व्रतीभूय नवाक्षिनन्द
पृथ्वीमितेऽब्दे विनयोज्ज्वलोऽसौ ।
पाञ्चालदेशे गुरुसेवया वै
निनाय वर्षर्तुयुगं जवेन ॥३७॥

शार्दूल०

आत्मारामुनीश्वरं स्वपुरतः कृत्वाऽथ यात्राकृते
भव्याभीष्टदपादलिप्तनगरीमष्टादशैते ततः ।

आगत्य प्रणतिं विधाय बहुधा स्तुत्वाच तीर्थेश्वरम्
तस्मादप्यगमंश्च राजनगरं नूत्याजितं स्वःपुरम् ॥३८॥

स्वा०

प्राप्य राजनगरं मुनिवर्याः
नेत्रलोकनिधिचन्द्रमितेऽब्दे
शिश्रियुर्विजयबुद्धिमुनीन्द्रं
बुद्धिमद्विजयबुद्धि विभासम् ॥३९॥

वसन्त०

धर्माधिपं मुनिवरं गुणसुन्दराङ्गम्
संसारनीश्रितजनाजयदं दयालुम्
ध्यानाग्निदग्धमदनेन्धनधीरधुर्यम्
केकीव वीक्ष्य जलदं मुमुदुर्मुनीन्द्राः ॥४०॥

स्रग्धरा०

देवागारं यियासुर्जलनिधिमगमत्
स्नातुकामेव पूर्वम् स्मृत्वाऽगस्त्येन

पीतोज्झितरूथ गगने सोमपीयूषकुण्डम्
यात्वा दृष्ट्वा कलङ्कं दिविचरवनिता
स्तूयमाना च नाके शक्रस्याद्यापि नूनं
नवनवरसदा राजते यस्य कीर्तिः ॥४१॥

स्वा०

प्रापदत्र निजसंयमगेहं
ढूंढकव्रजमनूपमवाण्या ।
संविबोध्य किरणैर्मुनिवर्गो
विष्टपं रविरिवास्तदशेषम् ॥४२॥

शिख०

य आत्मारामोऽसौ गुरुवरममुं बुद्धिविजयम्
निषेव्यानुष्णांशुं भृशमिव चकोरः प्रमुमुदे ।
तमेवाश्रित्यायं शमिविसनचन्द्रश्च जगृहे
गुरुदत्तं लक्ष्मीविजयघटितं नाम शिरसा ॥४३॥

उपगीति०

आनंदविजयनाम्ना विख्यातस्स सम्प्रतिक्ष्मायाम्
आत्मारामेतिपूर्वं यस्यासीत् विश्रुतिर्भूमौ ॥४४॥

मालिनी०

तदनु तदवशिष्टाः शिष्यिणू राममुख्याः
मुनिवरममुमेव ध्वस्तकामारिषट्कम् ।
सुविदितमहिमोऽन्वूद्राम एव प्रकामम्
कमलविजयनाम्ना विद्यया हृद्यया च ॥४५॥

शार्दूल०

आत्मध्यानपरायणो मुनिरसावेकाशनालङ्कृतः
शीतर्ताविपि केवलं तनुपटाभ्यामेवशीतं क्षिपन्
जित्वाऽऽलस्यमुखान्विपक्षनिकरांस्तीर्थकरांश्चिंतयन्
चातुर्मास्यमचर्करीदहमदाबादे व्रती निर्ममः॥४६॥
सोऽयं सत्तपसोदितैः शिशुरविश्रीहारितेजोऽङ्कुरैः
भ्राजिष्णुस्स्थिरधीर्गुरून्परिचरन् प्रस्थाय तस्मादथ।
श्रावंश्रावमनूपमान् जिनवचः पीयूषपूरान्गुरोः
चातुर्मास्यमधत्त भावनगरे सौराष्ट्रभूमण्डिते ॥४७॥

स्रग्धरा०

गंभीरध्वानपूर्णं मुनिघनवदन
स्यन्दिपीयूषबिन्दून् पंकोच्छेदप्रवीणान्

प्रवचनसमये मौक्तिकस्रग्समानान् ।
पायंपायं नितान्तं पुलकितहृदया
इत्यसारङ्गसत्याः धर्मे तापान्तकारि
एयविचलितमना यत्रैवै संबभूवुः ॥४८॥

इन्द्र०

शत्रुंजयोना दिव देलवाडे
त्यादीन्पुराणान्परिसृत्य तीर्थान् ।
चक्रे जनान् धर्मपरानतीव
योगीश्वरो गुर्जरदेशसत्यान् ॥४९॥

मन्दा०

प्रस्थायातः कमलमुनिराट् साधुवृन्दैःपरीतः
पाञ्चालानां निपतितमहामोहपाथोनिधीनां ।
दत्वोद्धर्तुं सरलधिषणो धर्महस्तावलम्बम्
ग्रामं प्रापत्सपदि गुजरान्वालनाम्ना प्रसिद्धम् ॥५०॥

मालिनी०

भवजलधिनिमज्जत्सज्जनोज्जीवनार्थम्
विजयकमलसूरौ भाषमाणे सभायाम् ।

नगरधुरिवरेण्यः इच्छरासिंहनामा
सदसि समुपयातः श्रावकाणां बलाद्धि

शालि०

हत्वा जित्वा लोलया भूरिजन्तून्
यो वै गेहं मांसमानीय तेषाम्।
अश्नाति स्म प्रत्यहं पाचयित्वा
चत्वारिंशन्मित्रवर्गैः समेतः ॥५२॥

मालि०

अथ विविधरसाभिर्योगिराड्व्याहृताभिः
श्रुतिपथमधुराभिः पावनीभिः कथाभिः।
गलितनिखिलशङ्कः द्रावितस्वान्त एषः
निजकृतिपरितप्तश्चाश्रुधारां ववर्ष ॥५३॥

शार्दूल०

विश्वाह्लादकरीं गिरीन्द्रकुहरप्रस्यन्दिवाणीरथीम्
धर्मामोदतरावहन्निलजतां पद्माख्यसूरीशितुः।

कष्टापद्विनिवर्तिनीं प्रवचनावाणीं निशम्याथ कः
पूताचारविचारचर्चितमतिर्नोस्याद्द्रुतं तत्परः ॥५४॥

उप०

सोऽयं मुनीन्द्रस्य दयामयोक्तिः
वाणीधुनीभिस्तिमितान्तरात्मा ।
जग्राह हिंसाकरणं च मांसा
शनं विहातुं नियमं च तस्मात् ॥५५॥

शार्दूल०

प्राणानां परिरक्षणाय सततं यत्नो विधेयो हृदा
प्राणेभ्योऽधिकमस्ति नैव दयितं किंचित्तनूधारिणाम्।
पुण्यं तस्य न शक्यते गणयितुं यः पूर्णकारुण्यवान्
इत्थं सूर्युदितं निशम्य सदसि नैके स्वशास्त्रं जहुः॥५६॥

अनुष्टुप्०

नैतच्चित्रं सदेशानां अदश्चित्रं गुरोर्गिराम् ।
यवनोऽपि जहौ मांसं पारंपर्येण संगतम् ॥५७॥

शार्दूल०

क्षेमारंभनिदानमास्तिकनृणां पापोत्करध्वंसकृत्
यद्यत्सूरिमुखोदितं प्रवचनं धर्मार्थसद्भूषणम् ।
तत्तद्भूरिदयासुधार्द्रमधिकं चेतोहरं चाभवत्
तस्मादेव दयाधुनी नृहृदयेष्वद्यापि नर्नर्ति हि ॥५८॥

टाँडाग्रामनिवासिनंबुधमणिः सन्दर्श्य जैनागमम्
मूर्तौ सोहनलालनामकमसौ मूर्त्यर्हणाद्वूषिणम् ।
प्रत्यादिश्य च तां पुपोष नितरां सद्युक्तिवृन्दैर्यतः
सन्तुष्टाश्च विधर्मिणोऽपि नुनुवुर्योगीश्वरं गायनैः ॥५९॥

वसन्त०

उत्तीर्णतामधिगतोऽपि च शास्त्रसिन्धुम्
दैनंदिनं सहि विचिन्तयति स्म भूयः ।
संसेवनं जिनपतेः रचितं ह्यजस्रम्
किं नोददात्यभिनवं फलमर्चकेभ्यः ॥६०॥

वांछाप्रतारणममत्वपिशाचवृन्दाः
सन्मांत्रिकं मुनिवरं मिहिरोपमाजम् ।

दृष्ट्वा पलायिषत वै प्रणिपत्य दूरम्
मूर्छन्त्यमी हि मलिनेषु न सज्जनेषु ॥६१॥

मालिनी०

दलितविकृतिजालं ब्रह्मचर्यं दधानः
बहुषु स नगरेषु प्रावृषेण्यानुषित्वा ।
जनततिमुपकुर्वन् गुर्जरे पंचनद्याम्
क्षणमिव नयति स्म ख्यातकीर्तिः समाः सः

स्रग्धरा०

ज्येष्ठे पक्षे वलक्षे नयनशरनिधि-
ग्लौमिते वैक्रमेऽब्दे पूताष्टम्यां धरित्री-
मथ किल विजयानंदसूरीश्वरोऽसौ ।
मेध्यां कृत्वा स्वधाम्ना सुविदितगुजरान्-
वालपुर्यां द्युलोकं आहूतो देववृन्दै
र्विमलयितुमिव प्रस्थितो ध्यानलीनः

दस्यून्जारान् किरातान् जनपदमथनान्-
ढूँढकान् श्रावकान्वै शिष्टान् कृत्वा च तेभ्यो-

जिनमतसुमतं नूत्नसम्यक्त्वरत्नम् ।
दत्वा तं योगिवर्यं सुरवरनगरीमाश्रितं
संविदित्वा व्याप्नोति स्मावनिं य
न्ननु च झटिति शोकाम्बुभृत्तन्न चित्रम् ॥६७॥

आर्या०

अज्ञानतिमिरभास्कर तत्त्वादर्शौं विरचितौ येन ।
पुनरपि तत्त्वनिर्णयप्रासादं जैनमतविभासम् ॥६५॥

वसन्त०

आंग्लोपवर्तनकरेण्यविचक्षणानां
श्रुत्वानुयोगवचनानि दृढाशयानि ।
मर्मस्पृगुत्तरवचोनिकरैर्विशंकान्
यस्तान् चकार विकसद्वदनांश्च नूनम् ॥६६॥

शार्दूल०

व्याख्यातुं समितावमेरिकजनैर्ग्रामं चिकागोऽभिधम्
संहूतः प्रणिधेर्मुखेन गमनं स्वीयं निषिद्धं वदन् ।

व्याख्यानं जिनशासनस्य रुचिरं सुश्रावयामास यः
नूलोकं किमु तस्य नाकगमने शोको नहि व्याप्नुयात्
तस्माद्धाबिटवाँनरेति विबुधः पीयूषकल्पं रसं
पीत्वा जैनिजमेतिनामकमसौ जैनाध्वसंसूचकम्।
ग्रन्थं यत्कृपया समारचितवान् सद्युक्तिजालैर्वृतम्
नूलोकं किमुतस्य नाकगमने शोको नहि व्याप्नुयात्
तद्व्याख्याश्रवणेन पूतमतयः दुष्टान्निजान्दुर्मतान्
उज्झित्वा रुचिरां जिनोक्तिसरणिं नैकेजनाः प्राप्नुवन्।
इत्थं यो बहुधाऽतनोज्जिनमतं द्विपान्तरेषु ध्रुवम्
नूलोकं किमु तस्यनाकगमने शोकोनहि व्याप्नुयात्
आचार्याख्यपदोत्सवःसमभवत्त्यब्ध्यंकनूहायने
ऊर्जे मास्यसिते दले शुचितिथौ शत्रुंजये पावने।
विंशत्येद्धसहस्त्रपूर्णजनताविश्राणितं तत्पदं
लेभे यः किमुतस्यनाकगमने शोको नहि व्याप्नुयात्

वसन्त०

विश्वोपकारकरणे सुदृढप्रयत्नम्
सूरीश्वरं दिविषदं जनता विदित्वा।

पूजामकारिषत तीर्थकृतां स्वशांत्यै
स्मृत्यै गुरोः प्रतिपुरं महतामहेन ॥७१॥

शिखरिणी०

तदीयं पट्टं भूषयितुमथको योग्य इति वै
वितर्के संप्राप्ते बहुदिवसमेते मुनिवराः ।
विविच्यैनं श्रेष्ठं कमलविजयं ख्यातमहिमम्
समानिन्युर्भक्त्या सुचरितवरं पत्तनपुरम् ॥७२॥

इन्द्र०

अर्हन्तमर्चन्तममुं मुनीन्द्रम्
गर्वं तमोजं कुदृशां प्रशान्तम् ।
कुर्वन्तमर्हं गुरुमन्तरेण
गुर्वन्तरं कोऽत्र गुणी वृणीते ॥७३॥

शार्दूल०

लावण्योत्तम नेम हिम्मत मुनिप्राग्र्यैश्चतुर्भिर्कृतः
शिष्यैस्सत्तपसा विसारिरुचिभिस्सोऽयं प्रतापी मुनिः।

आरक्तार्जुनपीतपट्टवसनैश्चित्रीकृतं तत्पुरम्
सेवायातसमस्तमानुषगणैरासेव्यमानोऽविशत् ॥७४॥

मालिनी०

कमलविजयविद्वद्रत्नपट्टोत्सवोऽत्र
प्रभवति सपदीति श्रावकेभ्या निशम्य ।
प्रमुदितहृदयाऽऽशास्त्वरं मण्डनाया-
यतिषत वसतिं वै केतुभिस्तोरणैश्च ॥७५॥

शार्दूल०

नानादेशसमागतेभ्यजनताप्रोच्चप्रणामण्डलम्
नम्रीभूय नमज्जनान्सविनयान्धर्माशिषा पावयन् ।
उच्चैस्तोरणवर्तिवाद्यनिवहश्राव्यध्वनीद्धं तदा
रम्योपाश्रयमाविवेश मुनिभिस्सच्छ्रावकैः संवृतः

पृथ्वी०

पदक्रियभितो मुदा जय जयेति सामाजिकैः
कृताञ्जलि परम्पराः प्रविदधत्कृतार्था दृशा ।

निशाकरकरार्जुनं प्रतिदिशं विसर्पि द्युतिम्
मुनीश्वरपुरस्कृतोऽयमधितिष्ठति स्मासनम्

मालिनी०

मुनिशरनवपृथ्वीहायने माघमासे
विजितसुरपुरेऽस्मिन्पत्तने पूर्णिमायाम्
कमलमुनिरसावाचार्यपट्टाभिषिक्तो
विजयकमलसूरिख्यातिमागाज्जवेन ॥७८॥

शिथिलितभवखेदा क्लृप्तचित्तप्रसादा
कुमतितटविशीर्णा रत्नवैराग्यपूर्णा ।
विमलपदतरङ्गा निम्नतात्पर्यसङ्गा
निरगमदतिरम्या सूरिराजुक्तिगङ्गा ॥७९॥

शिखरिणी०

क्वचित्प्राज्यं दानं क्वचिदखिलजैनाशनमहः
क्वचित्कीर्तेश्शंसा क्वचिदपि जिनार्चाऽष्टदिवसी ।
क्वचिद्धर्षाद्वास्यं क्वचिदपि सतीगायनरवः
समावर्तिष्टेत्थं ह्यनुपमतदीयोत्सववरः ॥८०॥

पृथ्वी०

तदैव खलु वाचकं विनयिवीरनामा मुनिः
प्रवर्तकपदं तथाऽलभत कान्तिनामा मुनिः ।
गुरोरमृतदेशनातृषितचेतसश्श्रावकाः
जलागमदिनानि यापयितुमाग्रहं संव्यधुः ॥७१॥

उप०

धर्मोपदेशप्रतिबोधधुर्यो-
ऽचरीकरीदुन्नतिमत्पुरं तत् ।
वर्षन् स सूरिर्घनवत्सुधर्मो-
पदेशधारा अमृतायमानाः ॥७२॥

प्रस्थाय वै संवसथाननेकान्
कृत्वोपकारान्बहुधा जनानाम् ।
श्राद्धाग्रहाद् वृष्टिदिनानि नेतुम्
स माणसाख्यां पुरमध्युवास ॥७३॥

वसन्त०

एकोनविंशतिवयस्कमसाववबोधि
स्नेहाद्विरक्तमपि संयमनिर्विषण्णम् ।

निर्वेदपूर्णवचनैः किल लाघचन्द्रम्
खिन्नं जनं मलयमारुतवद्धि तत्र ॥७४॥

शार्दूल०

वर्षारात्रमथ व्यतीत्य मुनिभिस्सङ्गम्य बोरूपुरम्
सूरीशोऽत्र विवेकिनेऽसितदले षष्ठीतिथौ कार्तिके ।
अङ्काजिह्मगनन्दचन्द्रकलिते वर्षे मुहूर्ते शुभे
तस्मै प्रादिशति स्म लब्धिविजयेत्याख्यां तथा संयमम्

वंश०

निशम्य वृत्तान्तमिदं समागताः
पितृष्वसृभ्रातृमुखा अनन्तरम् ।
अवेक्ष्य चक्रन्दुरतीव मोहतः
परं ह्यसौ धीरतया समाहितः ॥७६॥

इन्द्र०

किं युक्त इत्थं भवतां विलापो
विचिन्त्य सन्मार्गमथ प्रयाते ।

सत्यां सृतिं यन्तमवेक्ष्य रौति
प्रस्तौत्यसत्यां च हि मोहमुग्धः ॥८७॥

भुजङ्ग०

स्मृतिं याथ सद्यः शमं याथ यूयम्
मनोमोहजालं जहीथ ध्रुवं वै ।
जिनेंद्रान्भजन्तो मुनीन्द्रान्नमन्तः
सदा धर्मवृद्धिं कुरुध्वं स्वतृप्त्यै ॥८८॥

वैतालीयं०

न धनं न सुतो न सुन्दरी
न गृहं नोपवनं न बान्धवाः ।
न ममास्ति हि किञ्चिदुच्चकैः
इति यो वेत्ति न मोहमर्हति ॥८९॥

शालिनी०

कायं मत्वा नश्वरं चञ्चलान्तम्
चायुर्बुध्वा भङ्गुरान्सर्वभोगान् ।

पारं गन्तुं विश्वसिन्धोर्विदग्धैः
प्रव्रज्यायां साधु बुद्धिर्विधेया ॥९०॥

वैतालीयं०

चपलाचपलं हि जीवितम्
विषयास्सन्ति समे विषोत्कटाः ।
जडबुद्धिरसौ तथाप्यहो
न जनो मुञ्चति तान्मनाक् क्वचित् ॥९१॥

शिखरिणी०

अये संसाराब्धौ महति पतिताऽघौघनिचिताः
कलत्रापत्यस्वप्रणयविवशाः सत्यरहिताः ।
सदा लोभक्रोधस्मरपरवशा धर्मरहिताः
जनास्संसाराब्धिं कथमिव तरिष्यन्ति कथय

शार्दूल०

स्वल्पो जीवितकाल एष रचितो धात्रा पुनर्नश्वरम्
देहं हन्त कृतं च तत्रविविधा रोगाः पुनः कल्पिताः ।

एकस्यापि सुखस्य कोऽपि नियतंनो पारगो दृश्यते
तस्मात्सर्वमपास्य संयममसुं युक्तं दृढं चिन्तय

शिखरिणी०

इतीदं तद्वाक्यं श्रुतिपुटसुधासेकसदृशम्
निपीय प्रेमार्द्राः प्रणयजरबद्धाञ्जलिपुटाः ।
क्षमां याचन्तस्तेऽखिलमनुजवन्द्यं मुनिवरम्
नमन्तः प्राजग्मुर्निजधवसितं[१] शान्तहृदयाः

उप०

सूरीश्वरः सद्गुणरञ्जिताङ्गः
शिष्यैरनेकैस्सहितो हि तस्मात् ।
विहृत्य चानन्दपुरं विवेश
तत्रत्य संघैर्बहु मानितोऽसौ ॥८५॥

इन्द्रवंशा०

अत्राप्यसौ प्राक्तनजन्मपवित्रमा-
घौघान्नृणां वारयितुं सन्नासदान् ।

---

१ गृहं.

संव्रक्ष्य धर्मं निजगाद सुंदरम्
  रोगं प्रतीकर्तुमिवौषधं भिषक् ॥९६॥

उप०

ग्रामाननेकान्स विहृत्य चेत्थम्
  किरन्मनोभूमिषु मानवानाम् ।
धर्माम्बुधारा इव वारिवाहः
  तारङ्गतीर्थं समियाय तूर्णम् ॥९७॥

वंश०

प्रणम्य तत्तीर्थपतिं मुनीशिता
  चकार भावोद्ग्रथितैः स्तवैः स्तवम् ।
ततः सजँझापुरमन्वभूषयत्
  निजौजसा भास्वरयन्भुवस्तलम् ॥९८॥

उप०

यदीयपादाम्बुजसेवनाय
  लोका ह्यजस्रं समभिद्रुवन्ति ।

द्वात्रिंशदत्र प्रथितप्रजावम्
तमन्वयात्संयमिनां वराणाम् ॥९९॥

स्रग्धरा०

दीक्षामेकादशज्यो निशितमतिवरे-
ज्यो विरक्ताग्रियेज्यः छेदोपस्थापनीयां
विजयकमलसूरीश्वरः संयमीन्द्रः ।
लब्ध्यादिज्यो मुनिज्यश्शिवपथपथिक-
ज्योतिकल्पां सुकल्पां दत्वा तस्मात्प्रयातोऽ
विशदति विमलां चेडराख्यां पुरीं वै ॥१००॥

वसन्त०

जैनागमोदित सुधर्मरसार्द्रचित्तैः
श्राद्धैरजस्रमजियाचित एष सूरिः ।
खस्पर्शिमन्दिरततिप्रविजासमाने
वर्षर्तुवासमकरोन्नगरेऽत्र पूते ॥१०१॥

शार्दूल०

वाणीं धर्ममयीं निपीय विमलां सूरेर्मुखाम्जोरुहात्
स्वीचक्रुर्नियमान्स्वशक्त्यनुगुणं केचिन्मुनेरग्रतः ।

रात्र्याहारनिवृत्तिमप्यथ परे देवार्चनं सन्ततम्
केचित् संयमसंग्रहावधि निजाभीष्टार्थसंवर्जनम्

वसन्त०

इत्थं प्ररोप्य मनुजेषु हि बोधिबीजम्
सूरीश्वरो निगमवारिधिपारदृश्वा ।
धर्माम्बुवर्षणविधौ जलदो मुनीशैः
सार्धं पुरात्प्रचलितश्शरदत्यये वै ॥१०३॥

देवाण मोगरपुराधिपतीन्विनम्रान्
जीवादिरक्षणपरं त्रिविधं जिनोक्तम् ।
सुश्राव्य धर्ममतुलं दयया परीतम्
चक्रे ह्यसावखिलसत्वपरार्थदक्षः ॥१०४॥

तस्मादनेकनगरीयसुसज्जनानाम्
सिद्धान्तसिद्धविविधामृततत्त्वबोधात् ।
प्रस्थाय सूरिसुरराड् बहुधोपकारम्
कुर्वन् ययौ च वटपद्रपुरं विशालम् ॥१०५॥

इन्द्र०

सङ्घस्समानीतमृदङ्गवाद्य
भेर्या दिगन्तान्प्रतिवाचयन्तम् ।
हस्त्यश्वसेनापटलैर्विभासम्
आनेतुमेनं महमप्यकार्षीत् ॥१०६॥

स्रग्धरा०

धर्मिष्ठा भक्तियुक्ता गुरुगुणरसिका-
श्श्रावका ज्ञानवृद्धाः एकत्रीभूय सर्वे
सुविदितयशसं प्रार्थयामासुरित्थम् ।
चातुर्मास्यं कुरुध्वं गुरुगुणनिलया-
श्शान्तिदान्तिप्रकर्षाः कुर्वन्तो धर्मवृद्धिं
भवजलधिगतप्राणिषु ध्वस्तहृत्सु ॥१०७॥

आख्यानकी०

सङ्घाग्रहात्तत्र मुनीन्द्रपूज्यः
वियद्रसाङ्केन्दुमिते सुवर्षे ।
व्यधत्त चित्तं जलदागमं सः
विनेतुमत्रैव विनेयवर्गैः ॥१०८॥

उप०

विख्यातकीर्तेरमृतायमानाम्
वाणीं पिपासुर्मनुजेश्वरोऽसौ ।
सियाजिरावो विनयान्मुनीन्द्रम्
निजालयं पावयितुं ययाचे ॥१०९॥

मुहुर्मुहुः प्रार्थनयानुनीतम्
योगीश्वरं सूरिवरं यथार्हम् ।
सन्मानपूर्वं नृपतिर्हि भक्त्या
सौधं सुधर्मप्रतिमं निनाय ॥११०॥

वसन्त०

निस्सीमसुन्दरवचोनिकरैर्दयार्द्रैः
पीयूषजिद्भिरचितःप्रतिबोधदक्षैः ।
सन्तर्पितो नृपगृहे मुनिपुङ्गवेन
चक्रे मतिं निखिलजन्त्ववनेऽवनीशः

आनाकलोकपरिकीर्तितसच्चरित्र-
सूरीशितुस्तिमिरतस्करदीप्तिभासः ।

निःस्वार्थतामतितमामवलोक्य भूपः
शश्वच्छशंस महिमा हि सतामवर्ण्यः

उप०

सूरेर्विहारो भवितेति मत्वा
ससंभ्रमं सुप्रतराः स्रवंतीः ।
आश्यानपङ्काश्शरदा च पद्याः
प्राबोधि शक्तेः प्रथमं व्यधाय ॥११३॥

वसन्त०

इत्थं महोपकृतिमत्र विधाय तेषाम्
तस्माच्चचाल खलु वर्षदिनावसाने ।
देशान्तरं वचनचन्द्रिकया मुनीन्दुः
कर्तुं समं श्रमणभैरथ निस्तमस्कम् ॥११४॥

भुजङ्ग०

भरूचादि नानापुरीषु प्रवृद्धा·
नणीयोत्सवैस्सङ्घ सम्पादितैस्सः ।

समाराधितो धर्मवर्षी वितन्वन्
मुनीन्द्रिस्समस्तैस्तुवं मालवामैत् ॥११५॥

वसन्त०

रत्नग्रामपत्तननिवासिमहेभ्यसङ्घाः
विज्ञाय सूरिजलदं नवशुष्मतप्तान् ।
सन्तर्पयन्तमतुलोक्तिसुधाप्रवर्षै
रायान्तमत्र कृषका इव हर्षमीयुः ॥११६॥

मालिनी०

विजयकमलसूरेर्निर्गरोत्कण्ठयाऽसा
वभिमुखमथ सङ्घः पत्तिभिर्वाद्यवृन्दैः ।
करिभिरथ तुरङ्गैर्मेदुरस्सम्प्रतस्थे
जलधिरिव तरङ्गश्रेणिभिश्शीतरश्मेः

शिख०

जिनोक्तेरुद्धर्तः! परममदहर्तः! कुकृतिनाम्
अघौघानां छेत्तः! सततहितकर्तस्तनुभृताम्

निराकर्तः ! धाम्ना दिनमणिरुषां सूरिसुरराट्
समागत्यावास्मान्विषयविषमत्तान्निवसतिम्

उप०

सङ्घीययाचञां परिगृह्य सूरिः
पुरं विवेश प्रथितप्रभावः ।
लाजैश्च नार्यश्चतुरङ्गयुक्तम्
ववर्षिरे तं नृपवद्विशन्तम् ॥११९॥

किरन्हि धर्मामृतभूरिधाराम्
आश्वासयन्हृन्नरचातकानाम् ।
सूरेर्महासंसदि मेघनादः
विव्याध हंसानिव पाप्मजालम् ॥१२०॥

वसन्त०

तीर्थाय डूंगरसिलूणिय नामकोऽत्र
सङ्घं हि माएरुवगढाय चतुष्प्रतीकम् ।
सूरीन्द्रधर्मवचसा प्रतिबुद्ध एषः
शस्तं समारचितवाननु संक्रमेण ॥१२१॥

तस्याऽऽग्रहात्कमलसूरिरसौ प्रयातः
संघेऽनघे प्रवरवाचकवीरयुक्तः ।
तीर्थाधिपं नरसुराधिपसेव्यमान-
पादाम्बुजं विविधसंस्तवनैर्ववन्दे ॥१२३॥

पृथ्वी०

विलोक्य जलधिर्यथा न परिमाति पात्रे विधुम्
चिरेण रमणीमणिश्च रमणं प्रवासागतम् ।
महोदधिसमानशासनभृते मुनेर्विग्रहे
तथैव न ममुर्मुदो जिनपतेस्समालोकनात्

महीन्द्रपुरमाययौ मुनिवरैस्ततः सूरिराट्
महेभ्यजनताग्रहात्सुविदितं जिनेंद्रालयैः ।
मृगांकरसनन्दभूपरिमितेऽनघे वत्सरे
उवास जलदागमं सहि विभाव्य संप्रार्थितः

हरिणी०

अथहि बहवःपूजामाष्टाह्निकां विदधुर्मुदा
निजमतभृतां चक्रुर्भक्तिं मुदा बहुधा परे ।

द्रविणमधिकं जीवत्राणाय च प्रदद्दुर्जनाः
इति विमलयन्ति स्मात्मानं गुरोरुपदेशतः

वंशस्थ०

बटोदरापत्तनकोशनायकः
समेत्य चाढ्यो जमुनादिदासकः ।
समेतशैलं प्रति संघमेषितुम्
ससज्ज धर्मे दृढबद्धमानसः ॥१२६॥

वसन्त०

सम्प्रार्थितो मुनिपतिर्धनिसत्तमेन
सङ्घं विभूषयितुमेत्य समं विनेयैः ।
आज्ञानुवर्तिभिरथ व्रतसक्तचित्तैः
प्रस्थाय पूतमगसीजिपुरं ह्यवाप ॥१२७॥

आर्या०

मगसीजि पार्श्वनाथं
विश्वेशं प्राप्य निर्भरं मुमुदे ।

संघो विधाय पूजां
    चात्मौज्ज्वल्यं समाप्ते ॥१२८॥

उप०

ग्रामेष्वनेकेषु महोपकारम्
    कुर्वन्नसौ संघविनेयवन्द्यः ।
अल्पेषु मञ्जुलकशोभमानम्
    अहस्सु वै कर्णपुरं विवेश ॥१२९॥

वसन्त०

अत्रापि सः प्रवचनं विरचय्य कान्तम्
    प्राणिप्रपालनपरं महनीयकीर्तिः ।
लोकत्रयप्रणततीर्थमणिं मुनीन्द्रः
    काशीमियाय जिनमन्दिरविप्रकाशाम्

चञ्चत्सुकोमलतरङ्गकरावलीभिः
    सोपानराजिचरणं नमनच्छलेन ।
यस्यां निजात्मपरिपावनलोलुपेव
    भागीरथी विलसति स्वसती नितान्तम्

अस्या विहृत्य मुनिपुङ्गव एष वादि-
ध्वान्तार्यमा सुररमापरिगीतकीर्तिः ।
राजगृहीप्रभृतितीर्थभुवो निषेव्य
सम्मेतशृङ्गिणमवाप पवित्रतीर्थम् ॥१३२॥

शृंगाणि यस्मिन्निशि भान्त्यनारतम्
विचित्ररत्नप्रचुराणि कानिचित् ।
विस्तृतवरैरूर्ध्वमुखं मरीचिभिः
किर्मीरयन्त्यन्तिकतारकागणम् ॥१३३॥

यो विंशतिं वहति तीर्थकृताममुष्मात्
स्तूपान्मुदा शिरसि मोक्षपुरं गतानाम् ।
पौलस्त्यवत्क्षितिभृतस्समरे धुरीणान्
स्वस्पर्धिनः कमलयेव भुजान्विजेतुम्

उप०

आरुह्य संघैस्सहितस्स सूरिः
पुण्यव्रजं मूर्तमिवाद्रिराजम् ।

तीर्थेश्वरां श्चैत्यमुपेत्य सर्वे
विघ्नच्छिद्रान्संस्तवनैर्ननाम ॥१३५॥

शार्दूल०

यात्रां सूरिरसौ विधाय भुवनत्राणैकचिन्तापरः
वङ्गान्पंचशताधिकानथ कुलीनानामिषत्यागिनः
सत्वासत्वविवेकनासकचणठ्याहारहीरव्रजैः
कृत्वा ह्याजिमगञ्जनामकपुरं सत्रा विनेयैर्ययौ

यत्कीर्तिं नरनागदेववनिताजेगीयमानां भृशम्
श्रुत्वाऽऽस्यां व्यजहुर्ध्रुवं स्वयशसि ब्रह्मादयो देवताः
आयान्तन्तमतीव कौतुकभरा आनिन्यिरे नागराः
आनद्धैस्सुषिरैर्घनैश्च रमणीगीतैर्मनोज्ञं पुरं ॥१३७॥

वसन्त०

सूरीन्द्रवज्जलधरोऽपि शतह्रदाग्निः
सत्रा जगत्खरतरैः किरणैस्सुतप्तम् ।
निर्घोषपूर्वकमथामृतधारया वै
एयाय शीतलयितुं कृपया परीतः ॥१३८॥

उप०

अनेन सूरिस्समरं विधातुम्
वासं चकारेव जितेश्वरारिः ।
विघ्नौघविध्वंसविधिं वितन्वन्
शरप्रवाहैरिव गीःप्रवाहैः ॥१३९॥

तस्योपदेशश्रवणाय ये जनाः
समागताः प्रत्यहमत्र सादरम् ।
मिष्टस्य तेषां दिदिशुः प्रभावनाम्
अशीतिकर्षेण मितस्य नायकाः ॥१४०॥

साधर्मिवात्सल्यविधौ कदाचित्
सौवर्णटङ्कैर्गुरुदेशनातः ।
प्रभावनां श्रीं चपलां विदित्वा
चक्रे महेभ्यो दृढधर्मभावः ॥१४१॥

इन्द्रवंशा०

सूरेर्मुखाम्भोरुहतो विनिर्गतैः
व्याख्यातैश्च वैराग्यपरागसंचयैः

मासोपवासं द्धतिस्म वासिताः
पौराधिपानां प्रचुरा हि योषितः ॥१४२॥

इन्द्रवज्रा०

नाम्नाऽथ मेनाकुँवरीति राज्ञ्यः
चम्पापुरीमागमनाय याच्ञाम् ।
संघेन साकं मुनिपुङ्गवोऽसौ
स्वीकृत्य गन्तुं सुमनायते स्म ॥१४३॥

भुजङ्ग०

उपाध्यायवीरप्रधानैर्विनेयैः
इयर्ति स्म यात्रार्थमर्चिःप्रकाण्डः ।
क्रमप्रक्रमोत्क्रान्तरेणूत्करैस्सः
पवित्रेण संघेन चम्पापुरीं वै ॥१४४॥

ततस्तीर्थपं तत्र संपूज्य सूरिः
स्तवस्तोमपीयूषसुस्यन्दिपुष्पैः ।
चतुर्मासकार्थं वरेण्यैः पुरीयैः
अथाप्यर्थितो बङ्कराख्यां पुरीं च ॥१४५॥

उप०

पिपर्ति जन्तून्निजवत्समग्रान्
क्षितीशवर्य्यश्चतुरङ्गलोकैः ।
निषेव्यते सन्ततमित्थमेनम्
पञ्चालपृथ्वीजनता ययाचुः ॥१४६॥

इन्द्रवंशा०

सेव्यस्त्वमस्माकमथेश ! शासिता
निर्देशकश्चासि वयन्तु सेवकाः ।
शास्या नियोज्याश्च यतोऽनुकम्पया
सिक्त्वोपदेशैर्विषयं पुनीहि नः ॥१४७॥

शिखरिणी०

अगाधे दुःखाब्धौ बत निरवलम्बे निपतिता:
भवाम्भोधेरुद्धारक ! कथमुदासोऽसि भगवन् !
त्वमेवेशो गीर्भिर्वृजिननिकरान् हर्तुमुचितः
दयालो त्वां हित्वा कतममुपयामोऽद्य शरणम्

उप०

अभ्यर्थनामेष निशम्य सूरिः
प्रावृड्दिनान्ते गमनाय बुद्धिं ।
चकार दीनोद्धरणे हि सौख्यम्
मनस्विनो नो गणयन्ति नैजम् ॥१४९॥

क्रमेण नीत्वाम्बुदवासराणि
योगीन्द्रचूडामणिरेष सूरिः ।
प्रस्थाय तस्मादथ शिष्यवर्गैः
पञ्चालदेशाभिमुखं प्रतस्थे ॥१५०॥

शार्दूल०

धन्यं मन्यतया तृणीकृतधनैर्धर्मेषु दत्तादरैः
पञ्चालैः पुलकार्द्रदेहवसनैः संख्यातिगैः सादरम्
आनीतैर्ध्वजिनीतुरंगनिकरैरानद्धवाद्यादिभिः
ह्यम्बालानगरं विवेश मुनिराड्राजेव शिष्यैस्समम्

वंश०

जगत्त्रयानन्दविधायिसुंदरा
मगण्यनारीनरपूर्णसंसदि ।

दयाविरक्त्युज्वलरत्नभूषणाम्
चकार सूरिःप्रकरस्सुदेशनाम् ॥१५२॥

उप०

सूरीशितुर्वक्त्र हिमांशुबिम्बात्
विसृत्वरैर्मंधुमरीचिजालैः ।
जैनद्विजस्थानकवासिवृन्द
कुमुद्वतीपंक्तिरलिव्यकासीत् ॥१५३॥

स्रग्धरा०

ग्रामे ग्रामे जनेभ्यः प्रवचनमतुलं
श्रावयन्नेष सूरिः प्रख्यायास्मात् प्रतापं
त्रिभुवनविजयट्यप्रमुग्रं दधानः ।
कुर्वन्नानामतीयप्रबलबुधवरै
र्वादयुद्धं गभीरं तन्वन् जैनेन्द्रशिष्टिं
पुनरपि गुजरान्वालनाम्नीं पुरीमैत् ॥१५४॥

वसंत०

वर्षेऽब्धिषएनवमिताङ्कमिते शुभाब्दे
राधे सिते कमलसूरिरिह प्रतिष्ठाम् ।

आनन्दसूरिगुरुवर्यपदाम्बुजस्य
प्राघीकरद्बहुजनेद्धमहोत्सवेन ॥१५५॥

प्रहर्षिणी०

लुम्पाकास्तदभिजना महोत्सवं तम्
दृष्ट्वाऽज्ञानतिमिरभास्करं विरोधात् ।
आत्मारामुनिकृतं श्रुतेर्द्विजेभ्यः
हिंसोक्तेरतिपरिमर्शकं ह्ययच्छन् ॥१५६॥

उप०

सासूयवाणीनिकरैस्तथैते
विबोधयित्वा श्रुतिपक्षपातान् ।
विरोधवाक्यानि च सम्प्रदर्श्य
वादाय कौतूहलिनो ह्यकुर्वन् ॥१५७॥

तदीयवाग्जालविमूढचित्ताः
विपश्चितः सूरिसमक्रमित्वा ।
तद्ग्रन्थसन्दर्शितवाक्प्रपञ्चाः
श्रुतौ न सन्तीति दृढं जजल्पुः ॥१५८॥

वंशस्थ०

निशम्य वाणीं कृतिभिः प्रचोदिताम्
श्रुतिं समानाय्य गवेष्य सूरिराट् ।
प्रदर्श्य पात्रान्प्रविचार्य तैस्समम्
जिनागमं प्रोज्ज्वलयाञ्चकार सः ॥१५९॥

वसन्त०

वीरेण वाचकपदेन विभूषितेन
चारित्रयोगिविदुषा मुनिवल्लभेन ।
प्राज्ञेन बालसदमीमुनिसत्तमेन
वर्षर्तुवासमकृतात्र स पूजितांघ्रिः ॥१६०॥

इत्थं समुद्ररसनन्दमृगाङ्कवर्षे
प्रावृड्दिनानि मुनिभिस्समतीत्य सूरिः ॥
धर्मोन्नतिं प्रविरचय्य विहृत्य नारो-
वालेतिनामपुरमाविशति स्म तस्मात् ॥

इन्द्रवज्रा०

सूरीश्वरं गुर्जरदेशवासी
कश्चित्कुमारोऽत्र हि षोडशाब्दः ।

उम्मेदचंद्रो भवनिर्विषण्णः
शिष्याय दीक्षाग्रहनिश्चितात्मा ॥१६३॥

शिखरिणी०

गुरो मह्यं दीक्षां प्रदिश शुभकृत्सर्वजगताम्
भवाब्धेस्तापत्रय शमनदक्षां सुविमलाम्।
मुमुक्षूणां नावं त्रिभुवनललामाद्भुतनिधिम्
दयासिंधो बंधो त्वमसि करुणापूर्णसुतनुः

वसन्त०

औत्कंठ्यमस्य समवेक्ष्य शुभे मुहूर्ते
दीक्षां ददौ विनयिने वशिनां पुरोगः।
गंभीरनाम विजयान्त्ययुतंच तस्मै
शिष्यं तु लब्धिविजयस्य मुनेश्चकार॥१६४॥

चर्चां विधाय विमतैस्सह भूरि तत्र
जित्वा जिनेन्द्रमतमुन्नतिमच्च कृत्वा।
प्रस्थाय शिष्यसहितो महितांघ्रिराप
पौरैर्विभूषितपुरीं सच झंडियालाम् ॥१६५॥

उप०

पौराग्रहात्तत्र विधाय चातु-
र्मासीं मुनीशो ह्युपदेशनातः ।
विकीर्य धर्मामृतमाश्रवाणाम्
हृद्भूष्विवाब्दोऽथ विहर्तुमैच्छत् ॥१६६॥

शार्दूल०

सूरिर्यास्यति गुर्जरावनिमिति श्रुत्वाथ पांचालकाः
बाष्पेणाविलचक्षुषः करपुटं कृत्वा यथा चुश्रुशम् ।
स्वामिन्भूमिरियं विना तव पदक्रांतिं कथं स्यादरे!
अस्मान्वावितुमीश कः करुणया दुःखाम्बुधेरीश्वरः ॥

शिखरिणी०

कुदृष्टीशाखर्वप्रततमदगर्वप्रशमन !
कलिद्रोहिन्दीनोद्धरणधृतबुद्धे ! मुनिपते ! ।
महानन्दाम्भोधे ! जिनमतशिरोभूषणमणे
दिशास्माकं स्वामिन्किमिति करणीयं समुचितम
(युग्मम्)

इन्द्रवज्रा०

आकर्ण्य तेषां गुरुभक्तिजाजा-
मार्तध्वनिं लब्धिमुनिं समर्थम् ।
गंभीरशिष्येण समं विहर्तुम्
देशे ह्यमुष्मिन्स समादिदेश ॥१६९॥

वंशस्थ०

गुरोरनुज्ञां शिरसा वहन्मुनिः
पुरेष्वनेकेषु मनोज्ञदेशनाम् ।
समाचरन्वादमपि द्विजन्मभिः
मुनीषिभिःषट्छरदो ह्यनीनयत् ॥१७०॥

शार्दूल०

बीकानेरपुरं विहृत्य मुनिभिस्तस्मात्तु सूरीश्वरः
धन्वद्रोणिनिवासिमानवगणै रभ्यर्थ्यमानो भृशम् ।
वर्षे षट्सनन्दचन्द्रकलिते प्रावृण्निवासाय वै
भास्वद्भूषणमण्डितं पुरजनैः सन्मानितः प्राविशत्

मालिनी०

दुरितमवनतानां दुर्निरोधं निरुन्धन्
सितमतिभिरतन्द्रैः सेव्यमानो मुनीन्द्रैः ।
सुरगुरुधिषणाया जित्वरीभिर्वचोभिः
सभिकमनुजहृन्द्यानन्दयामास नित्यम्

उप०

तस्मात्सुराणा शिवचन्द्रसूनुः
सुमेरुमल्लो धिषणाग्रगण्यः ।
संघे जेसल्मेरपुरं हि यात्रा·
कृतेऽथ संन्नाहयति स्म गन्तुम् ॥१७३॥

मालिनी०

जनपदहितहेतु धर्ममार्गोपदेशात्
सुविदितजिनतंत्रः प्रार्थितस्संघपेन ।
वहुविधमनुनीत्या शिष्यवृन्दैः परीतः
व्रतिपतिरथ यात्रां कर्तुकामः प्रतस्थे॥१७४॥

इन्द्रवज्रा०

तीर्थं समेतो ह्युपदिश्य तस्य
माहात्म्यमेषो मनुजान् विबद्ध्य ।
प्रीत्या प्रणत्याथ वृषेव सम्यक्
स्तुत्वा महानन्दमवाप सूरिः ॥१७५॥

भुजङ्ग०

ततः पत्तनं प्रीतचेताः प्रतस्थे
मुनीन्द्रः पुरं पूर्णशृङ्गाररम्यम् ।
यथा मानसं राजहंसः पयोदं
समुद्वीक्ष्य भागीरथीपूरमध्यात् ॥१७६॥

उप०

सभाजितं पत्तनमेष सूरिः
प्रविश्य पौरैरभिनन्द्यमानः ।
प्रावृण्निवासं ह्यकरोन्मुनीन्द्रैः
वाचंयमत्वं परिगृह्य नित्यम् ॥१७७॥

पंचचामर०

प्रचण्डधर्मकण्टकप्रखण्डनैकपण्डितः
कपोलकल्पितं विसारि राजचन्द्रदं जिना
क्वचिज्जिनेंद्रशासनप्रभंजकं मृषा मतम्
बभञ्ज तत्र युक्तिभिर्दृढं मुनीन्द्राख्यम्

उप०

यं राजचन्द्रं मनुते स्म पञ्च-
विंशं जिनं धर्मविलोपदक्षम् ।
तदीयवाग्जालविमोहितात्मा
सन्मार्गविश्लेषितभक्तवर्गः ॥१७॥

एतन्मतस्योत्तमतां ब्रुवाणौ
प्रवर्तकौ द्वौ शिवलालनाख्यौ ।
अधर्ममार्गप्रसराच्च सूरिः
निवर्तयामास तथा वचोभिः ॥१८॥

इन्द्रवंशा०

योऽपि स्वसंघाटकविश्रुतो मुनिः
प्राक्पापकर्मोदयतोऽन्वमन्यत ।

दोषं कदापीति न चैतकावितः
तत्याज सूरिस्तमपि प्रकृष्टधीः ॥१०१॥

शिख०

धनाढ्यो दीनो वा प्रभुरपि सुहृद्वाथ जनकः
सतीर्थ्यो वा बन्धुः प्रियतमविनेयो वरमतिः।
मृषात्वं यः कोऽपि श्रयति यदि वै रिसुरपः
प्रतीकारं तं मेळयति नहि हित्वा समुदये

विजयनेमिमुनीन्द्रमुखा इदम्
श्रुतिपथं परमाएरुलिका अपि।
अथ विधाय मुनीश्वरमेतकम्
वरगुणं प्रशशंसुरतीव वै ॥१०३॥

वंशस्थ०

व्यनूषयन्नेकपुरेषु संचरन्
वटोदरापत्तनमेष सूरिराट्।
हरिद्रसाङ्केन्दुमिते हि वत्सरेऽ
करोच्चतुर्मासकमाग्रहान्नृणाम् ॥१०४॥

उप०

सुदेशनां भव्यनृणां वितन्वन्
दुष्कर्मसंधुक्षणसूरिदक्षाम् ।
सन्मङ्गलोदग्रतरप्रभावः
धर्मोन्नतिं चारु चकार सूरिः ॥१०५॥

ततोऽङ्कषण्नन्दमृगाङ्कवर्षे
खंभातपुर्यां जनताग्रहेण ॥
वर्षर्तुवासं शुभदेशनातो
ह्यनीनयद्धर्मधुरंधरस्सः ॥१०६॥

वसन्त०

श्रीवीरवाचकमुनिप्रमुखान्वितोऽतः
निर्गत्यच प्रसृमरद्युतिभासमानः ।
प्रज्ञाबलार्जितयशा स्सततं दयार्द्रः
सौराष्ट्रनीवृति सुखं चलतिस्म सूरिः ॥१०७॥

यत्र यत्र मुनिरेष समागात्
तत्र भव्यजनता मुनिमेनम् ।

रक्षितुं किमुदितो भवजन्तून्
गौतमोऽन्य इति वीक्ष्य तु मेने ॥१८८॥

उप०

दृग्गोचरीकर्तुमथ प्रतस्थे
पुरादमुष्मात्स हि भव्यलोकैः ॥
शत्रुंजयं शैलपतिं विजेतुं
षड्वर्गमुच्चैरिव वैरिणां जवात् ॥१८९॥

भुजङ्ग०

अथागत्य शैलं प्रमोदेन सर्वैः
निपीयोल्लसन्नेत्रपत्रैरलम्भि ।
मुमुक्षुर्हि यादृक्सुखं मोक्षपुर्याः
भुवि द्वारमासाद्य तादृक्सुखं वै ॥१९०॥

वसन्त०

आरुह्य भूधरमणिं मुनिपुङ्गवोऽथ
शीतांशुकान्तमणिरत्नगणैः प्रणीतम् ।
स्वाराट्कुबेरभवनान्युपहासयन्तं
भेजे युगादिजिनमन्दिरमुत्तमं सः ॥१९१॥

पृथ्वी०

प्रविश्य जिनमंदिरं गुरुवरः प्रणम्यादिमम्
जिनं मधुरिमाङ्कितैर्नवनवैस्स्तवैरस्तवीत् ।
प्रमोदभरमानसः विकसिताक्षिपद्मा मुनिः
स्मरन्जिनपतिं हृदा बहिरगान्मनोज्ञालयात्

भुजङ्ग०

ततः पादलिप्तं पुरं प्राप्य सूरिः
जनान्रंजयन्धर्मवाणीमणीभिः ।
तदीयाग्रहात्तत्र किंचिद्दिनानि
ह्युषित्वा प्रतस्थे विनेयैः परीतः ॥१०३॥

मालिनी०

पठितसकलधर्मः शासनोद्दीपकोऽसौ
सततमवहितात्मा जीवरक्षाग्रगण्यः ।
विजयकमलसूरिः प्रस्थितश्शिष्यवर्गैः
अलभत नगरं सीहोरनाम प्रशस्तम् ॥१०४॥

उप०

ऽथतन्तनीत्तानननुगृह्य लोकान्
आगृह्णतो वारिदवासराणि ।
समुन्नतिं चूरि सुदेशनातः
तिष्ठन्नसावत्र मुनीन्द्रवंद्यः ॥१८५॥

अथोपधानं विधिवद्विशुद्धम्
समस्तकर्मेन्धनदाहदक्षम् ।
नानापुरीसङ्गतसच्चरित्र-
श्राद्धैस्समृद्धं तपसाभिरामम् ॥१८६॥

मुनीन्द्र सद्देशनया प्रणुन्नः
लोको हि कृत्वा महता महेन ।
तदीयपाणयम्बुरुहेण मालाः
जग्राह धर्माधिगतधिकारः ॥१८७॥

(युग्मम्)

शार्दूल०

पञ्चालावनिवासिनऽथजनतोद्धाराय यं प्राधुनक्
सोऽयं लब्धिमुनीशिता मुरुपदाम्भोजं स्मरन्सर्वदा ।

अज्ञानाखिलजन्मकर्मगहनारण्यं प्रबोधाग्निना
भस्मीकृत्य विसारयन्जिनपतेराज्ञाध्वजं सर्वतः ॥

कृपालाभिधपत्तनं निजपदांभोजेन संफुल्लयन्
राजन्तं विनमज्जनैरनुदिनं संस्तूयमानं गुरुम् ।
वर्षे भूमुनिनन्दचन्द्रकलिते सूरेः समुत्कण्ठया
पादांभोरुहसेवने द्रुतमुपायाति स्म धीमद्वरः

(युग्मम्)

पृथ्वी०

समुद्र इव सिंधुभिर्ह्यभिगतः सदा सज्जनैः
सदैव हितदर्शनो विधुरिव प्रतापी वशा ।
क्षमी क्षितिरिवार्तिहृत् विमतगर्वनिर्भंजकः
स ईडरपुरीमगात्सुविचरन्भुवं गौर्जराम्

भुजङ्ग०

चतुर्मासकं वासमत्र प्रकुर्वन्
अजस्रं दिशन्धर्मबोधं मनोज्ञम् ।

समुद्दीपयामास सङ्घं महर्षिः
यथा भानुमान्भानुभिर्मेदिनीं वै ॥२०१॥

शार्दूल०

यत्प्राग्धर्मधुरीणसम्प्रतिमहाराज्ञात्र भक्त्या गिरौ
तीर्थेशोन्नतचैत्यमुत्तममकार्येतर्हि तज्जीर्णताम् ।
दृष्ट्वा सूरिवरः प्रबोध्य धनिनस्तस्योध्धृतिं संघपैः
रूप्याणां व्ययतो व्यदीधपदसौ लक्षद्वयस्य द्रुतम्

उप०

विनम्रसङ्घानुनयेन सूरिः
विपश्चितो लब्धिमुनीश्वरस्य ।
पदं महेनादित जैनरत्न-
व्याख्यानवाचस्पतिसंज्ञमत्र ॥२०३॥

इन्द्रवज्रा०

पर्यूषणाद्युत्सवमत्र रम्यम्
आष्टाह्निकं वांछितदात् सूरिः ।

सद्‌बोधिबीजं च विधाय सम्यक्
सन्देहसस्योन्नतिमाततान ॥२०४॥

निर्गत्य तस्मान्मुनिवृन्दवन्द्य-
पादारविन्दश्शमिनां वरेण्यः ।
सद्धर्मविश्राणनवारिवाहः
खम्भातनाम्नीं पुरमाययौ सः ॥२०५॥

उप०

श्राद्धैर्निशम्याथ कृतैरनल्पैः
महैर्मुनीन्द्रागमनं समुत्सुकैः ।
अभ्यर्चितः सन्नुतकीर्तिरेषः
शिष्यैस्समेतः पुरमाविवेश ॥२०६॥

इन्द्रवज्रा०

आडम्बरं वीक्ष्य पयोवहस्य
बह्वाग्रहात्तत्पुरसङ्घपानाम् ।
सूरिर्द्विवाज्यङ्कहिमांशुवर्षे
वासं व्यकार्षीच्छ्रमणाग्रगण्यः ॥२०७॥

उप०

दिगन्तविश्रान्तयशा महर्षिः
व्याख्यानतो धर्मसुधां जनानाम् ।
निशामयन् श्रीजिनपादपद्म-
संसेवनात्कालमनीनयत्सः ॥२०८॥

क्रमाच्छरत्कालमतित्य सूरिः
ज्ञानस्य देवस्य च कारयित्वा ।
द्रव्यस्य वृद्धिं प्रचुरां व्यकार्षीत्
अथोत्तमैश्शिष्यगणैर्विहारम् ॥२०९॥

परिभ्रमन्भूरिपुरीषु पौरै-
रभ्यर्च्यमानांघ्रिरसौ सुविद्वान् ।
सन्तर्पयन्धर्मसुधाप्रपूरै-
र्वचःप्रकर्षैः परिणूतकीर्तिः ॥२१०॥

द्रुतवि०

कपडवञ्जपुरं यमिनां वरः
सह विनेयवरै र्मुनिसत्तमैः ।

घनरवप्रतिभैः पटहादिभिः
कलकलैरनुनीत इवाय सः ॥२११॥

उप०

तोष्टूयमानोऽनुपदं बुधेन्द्रैः
विकीर्यमाणः पुरसुन्दरीभिः ।
सोत्कण्ठिताभिः पथि लाजपुष्पै-
रुपाश्रयं सोऽश्रयदाश्रवेद्धः ॥२१२॥

प्रवासिनारीहृदयंतुदोऽयम्
प्रोत्साहयन्संघमिवार्थितुं तम् ।
जगर्ज विद्युद्रुचिरस्तडित्वान्
नभोङ्गणे जेतुमिव त्रिलोक्याः ॥२१३॥

इन्द्रवज्रा०

भक्त्या नताङ्गैर्बहु याचितस्सन्
श्रीसंघलोकैः प्रमदासहायैः ।
लोकाश्वनन्दौषधिपाब्दचातु-
र्मासं ह्यसौ कर्तुमना बभूव ॥२१४॥

उप०

अत्रापि धर्म्यां धुरमुद्वहन्स
सूरीशिताऽतीतृपदुच्चवाग्भिः ।
निदाघपापौघविघातकाभिः
धाराभिरभ्रं जनतां धरावत् ॥२१५॥

भुजङ्ग०

उषित्वा कियन्मासकानत्र सूरिः
ग्रहाणामिवाभ्रे ग्रहैः सार्वभौमः ।
मुनीन्द्रैस्समं प्रस्थितः चण्डतेजाः
ततानायने तत्पुरात्तत्परैः सः ॥२१६॥

इन्द्रवज्रा०

लोकंपृणस्यागमनं विदित्वा
सज्जीबभूवुः श्रमणोत्तमस्य ।
बोर्सद् पुरस्थाः पुरतोऽभिगन्तुम्
आमोदरोमाञ्चितदेहभाजः ॥२१७॥

शालिनी०

वादित्राणां नैकशब्दैस्तदानीम्
गर्जारावस्पर्धिदिग्व्यापृतैश्च ।
वन्दिस्तोत्रैः सुन्दरीगायनैस्सः
शिष्यैर्व्यातो बोसदं प्राविवेश ॥२१८॥

केचित्पौरा वीक्षितुं कौतुकेन
केचिद् भक्त्या वन्दितुं योगिराजम् ।
केचिद्धर्मं श्रोतुकामा मनोज्ञम्
केचिन्मिष्टं प्रेप्सया ह्यागमन्द्राक् ॥२१९॥

देवज्ञानद्रव्यवृद्धिं प्रकुर्वन्
वर्षारात्रं श्राद्धवृन्दाग्रहेण ।
आचार्योऽसौ विश्वबोधप्रवीणः
तेने प्रस्थानं ह्युषित्वा विनेयैः ॥२२०॥

पंचचामर०

प्रमोदमेदुराञ्जनान्विधाय भूरि पत्तने
स्वयं नयन्प्रशान्तिमुक्तिपंक्तिभिर्नृदुष्कृतीः ।

विनेयवर्गवन्दिताङ्घ्रिपङ्कजो मुनीश्वरो
डभोइ पत्तनं जगाम सर्व सत्त्वपालकः ॥२२१॥

भुजंग०

ततः पौरवानीतवाद्यप्रभेदै-
र्यशोगायनैः सत्कृतो नागरैस्तः ।
पुरीं भूषितामाविवेश प्रगल्भ-
प्रभाभासुरः सूरिसूरस्स्वशिष्यैः ॥२२२॥

मालिनी०

शरमुनिनवपृथ्वीसंमिते हायनेऽस्याम्
कमलविजयसूरिर्योगिनां सार्वभौमः ।
अकृत शुभनिवासं धर्मवर्षां विधातुम्
घन इव खलु वर्षावासराणि व्यतीतुम्

उप०

तपांसि नैके कठिनानि चक्रु-
र्नैके ह्यनेकान्नियमानगृह्णन् ।

चैत्येषु दानं गुरुदेशनातः
व्यधुः परे प्राज्यमुपाश्रयेषु ॥२२४॥

इन्द्रवज्रा०

सम्प्रस्थितं मेघमिवोपकर्तुम्
वक्तुं पिकं मृष्टमिव स्थितं तम् ।
मध्ये पथि श्रावकभव्यलोकः
सम्भ्रातपौरः समगंस्त नेतुम् ॥२२५॥

भुजङ्ग०

ततः प्राविशत् स प्रणीते मुनीन्द्रः
क्रमात्पर्यटन् क्ष्मातलं कान्तकीर्तिः ।
महाडम्बरे पतनं सन्नुतांघ्रिः
विनेयैर्वरिष्ठैरिदं भव्यलोकैः ॥२२६॥

वंशस्थ०

पुरप्रवेशोऽस्य समुत्सुका जनाः
नतिं विधायाथ निपीय देशनाम् ।

प्रभावनाद्युत्सवमुन्नतं व्यधुः
प्रमोदपाथोनिधिमज्जिताङ्गकाः ॥२२७॥

उप०

आशैशवान्निर्मलब्रह्मचारी
नित्यं जिनाराधनतत्परोऽत्र ।
चारित्ररक्षाप्रवणस्स विद्वान्
उवास वर्षर्तुदिनानि नेतुम् ॥२२८॥

वंशस्थ०

अथ त्रिलोकीजनतापहारिणीम्
दयाविरक्त्यादिसुधर्मदीपिकाम् ।
महामहिम्ना मिहिरापमानकः
ततान वाणीमनुवासरं मुनिः ॥२२९॥

इन्द्रवज्रा०

धर्मोपदेशश्रवणाद्धि तस्मिन्
लक्ष्मीं विदित्वा चपलां नितान्तम् ।

पाथेयमीप्सुः परलोकमार्गे
नानाविधं दानमदाच्च लोकः ॥२३०॥

उप०

इत्थं विधायात्र महोपकारम्
दयानुरागी भवनिर्विकारी।
निर्गत्य तस्मादथ शिष्यवृन्दैः
चचार सूरिः प्रचुरासु पूर्षु ॥२३१॥

वटोदरापत्तनमेष आगात्
संघेन धर्मस्पृहयालुनाथ।
सन्मानितः साधुमहामहैर्द्राक्
वर्षानिवासाय मनीषिवन्द्यः ॥२३२॥

शार्दूल०

अश्वर्ष्यङ्कहिमांशुसंख्यशरदि स्वामी मुनीनामसौ
अर्हद्धर्ममसारसंसृतिसरद्भ्रान्तात्मनां प्राणिनाम्।
आधारं निजतापकर्तनविधौ सुश्रावयन्सूक्तिभिः
नैकान्धर्मदृढव्रतानकुरुत श्रद्धाविहीनानपि ॥२३३॥

उप०

यः कोऽपि सूरिं समवेक्षते स्म
प्रभुर्ध्वलोकीति स मन्यते स्म ।
एतन्मतस्योरुविराधकोऽपि
नतिं विलोक्य स्म करोति चैनम् ॥२३४॥

इंद्रवंशा०

पश्चात्त्वंशीधरनाम कोविदः
नैयायिकः सच्चरितं गुणालयम् ।
आजानुबाहुं सुविशालजालकम्
प्रीत्या ब्रवीति स्म विलोक्य यं मुनिम् ।

उप०

अर्हन्मते मे हृदयापहारी
सिद्धाचलादीश्वर एकएव ।
देवेषु चैवं मुनिपुङ्गवेषु
चरित्रनाथः कमलादिसूरिः ॥२३६॥

इन्द्रवज्रा०

छायापुरी मेष समाजगाम
सूरीश्वरः श्रीकमलाऽभिधानः ।
श्रीसङ्घबह्वाग्रहतो नगर्षि-
निध्येकवर्षे सह शिष्यवृन्दैः ॥२३७॥

उप०

समेतमेनं गुरुदेववर्यं
विद्वत्तमं शारदचन्द्रकीर्तिम् ।
पुरस्थसङ्घो महता महेन
प्रवेशयामास पुरं सुसज्जम् ॥२३८॥

धर्मोपदेशं ह्यमृतायमानं
भवौषधं नित्यसुखप्रदायम् ।
निःशेषकर्मक्षयमार्गदर्शी
ददौ तदा श्रीकमलाख्यसूरिः ॥२३९॥

सुधोपमाभि गुरुदेशनाभि-
राकर्णिताभिर्विविदुश्च भव्याः ।

श्रीवीतरागोदितधर्मतत्त्व
मापेदिरे ज्ञानमभूतपूर्वम् ॥२४०॥

वसन्त०

शा० खीमचन्द हरगोविनदासकस्य
सत्पुत्रमुत्तमधियं छबिलाऽऽदिदासम् ।
मोक्षाऽर्थिनं विषयवैमुखतामुपेतं
वैराग्यवासितहृदं विगतप्रमोहम् ॥२४१॥
प्रव्राज्य चारुविहितोत्सवतः पवित्र
सत्पाणिना विजयलब्धि मुनीश्वरस्य ।
शिष्यं विधाय भुवनेति सुनाम चक्रे
श्रीमानदभ्रमहिमा कमलाऽऽख्यसूरिः

इन्द्रवज्रा०

तिष्ठन् पयोदाऽऽगमकालमेष
व्याख्यानपीयूषमजस्रमत्र ।
वर्षंस्तडित्वानिव वारि सर्वान्
पिप्राय सूरिः कमलाऽभिधोऽयम् ॥२४२॥

उप०

आष्टाऽह्निकश्चारुतरश्च तत्र
महोत्सवोऽकारि जनैरशेषैः ।
प्रभावनाभि र्बहुनृत्यगीतै
र्वाद्यै रनेकै रतिशोभनीयः ॥२४४॥

स्रग्धरा०

शान्तिस्नात्रप्रपूजा समभवदतुला
वाञ्छितार्थ प्रदात्री श्री सङ्घाऽऽनन्ददोह
प्रचयमनुदिनं संविधात्री जगत्याम् ।
विघ्नाऽत्यन्तव्यपाय प्रकरणरसिका
तुष्टिपुष्टि प्रदोग्ध्री दात्री भुक्तेश्च मुक्ते
रतिशयसुयशो विस्तृणाना हि तस्याम्

इन्द्रवज्रा०

श्रीमद्गुरोः सूरिगणाऽग्रण्य
सङ्घीमतश्चाऽस्य महोपदेशात् ।

जीवाऽनुकम्पाकृतये तदानीं
द्रव्योपचायो बहुरेव जज्ञे ॥२४६॥

उप०

जैनान्यलोका अपि राजकीय-
महापुमांसो बहवश्च तत्र ।
व्याख्यानमाकर्ण्य गुरोरमुष्य
सावद्यकृत्यादखिलाद्विरेमुः ॥२४७॥

ज्ञानाऽधिकाऽभ्याससदात्मतत्त्व
सुचिन्तनाऽध्यापनकृत्यजातैः ।
प्राधान्यतस्तत्र पयोदकालो
यातोऽनगारत्वमुपागतानाम् ॥२४८॥

तदन्तिकाऽनेकपुरस्थलोकाः
श्रीमद्गुरोर्दर्शनकाङ्क्षया हि ।
समागतानां बहुभक्तिभाजां
पानाऽशनाऽऽदिं व्यदधुश्च पौराः ॥२४९॥

वसन्त०

वाणीपुरीवसतिकः सकलो हि सङ्घः
सद्धर्मकृत्यकरणे जगति प्रसिद्धः ।
देवे गुरौ च सतताऽधिकभक्तिकारी
सुश्रावकाऽखिलगुणैरतिशोभमानः ॥

इन्द्रवज्रा०

हेतोरमुष्माद् गुरुदेव एष
तत्रत्य सङ्घाय ददावपूर्वम् ।
सद्धर्मलाभं पुरुषार्थहेतु
मागाद्गुमेटां विहरंश्च तस्मात् ॥२५१॥

उप०

गुरौ विहारं कृतवत्यमुष्मिं·
श्छाणीस्थभव्या जनता समस्ता ।
तद्देशनाया विरहादसह्या-
च्छोकोदधावेव पपात सद्यः ॥२५२॥

गरिष्ठमाचार्यमुपेयिवांसं
तत्रस्थसङ्घोऽपि महोत्सवाद्यैः ।
प्रावीविशत्स्वं पुरमर्हणीयम्
योगीन्द्रधोरेन्द्र-जनाऽग्रगण्यम् ॥२५३॥

स देशनां तत्र ददौ पयोद-
नादानुकृत्याऽमृततुल्यवाचा ।
संसारवार्धिं तरितुं सुपोत
कल्पामनल्पां बहुबोधदात्रीम् ॥२५४॥

ततः सुभव्यान् बहुधोपकुर्वन्
धर्मोपदेशैः सह शिष्यवृन्दैः ।
क्षितिं पुनानः क्रमकञ्जसङ्गैः
सम्पाययन् धर्मकथाऽमृतानि ॥२५५॥

ग्रामाननेकान् विहरन्नुमेटा
पार्श्वस्थिताङ्ब्रीकमलाख्यसूरिः ।
चन्द्रश्चकोरानिव भव्यजीवा
नानन्दयामास सुसंयमीन्द्रः ॥२५६॥

वर्षर्तुकालं निकषा ह्युमेटा
निवासिसङ्घप्रचुराऽऽग्रहात्सः
आगादुमेटा पुरि सूरिराजः
कर्तुं चतुर्मासनिवासमत्र ॥२५७॥

पुरप्रवेशः समकारि सङ्घैः
भेर्याऽऽदि नानाविधवाद्यघोषैः ।
सुश्राविकायूथसुमिष्टगानैः
श्राद्धाऽऽदिवर्गैरमितैश्च सूरेः ॥२५८॥

चरित्रनेता प्रवया अपीह
स्वीयाऽन्यदीयाऽतुलशातमिच्छुः ।
मुक्तः प्रमादैर्जनविनामजस्त्रं
धर्मोपदेशं ददमान आसीत् ॥२५९॥

नराऽधिनाथोऽपि समेत्य भक्त्या
श्रीमद्गुरो जीवदयाप्रधानम् ।
व्याख्यानमाकर्ण्य भवाब्धितारि
सावद्यकर्माणि बहून्यहासीत् ॥२६०॥

भुजङ्ग०

तपस्याः प्रशस्या भृशं संबभूवु-
 र्यशस्या वयस्याः सुमुक्तेश्च वध्वाः ।
समुत्साहवन्तो जना उत्सवांश्च
 गुरोर्देशनाभिः पुरेऽस्मिन् प्रचक्रुः ॥२६१॥

चतुर्मासपश्चाद्बरोदानरेशैः
 महाराजसूरिः समाकारितः सन् ।
बरोदामयासीत्सहाऽनेकशिष्यैः
यशोवान् प्रविद्वान् क्षमा-शान्तिमान् सः ॥

उप०

वटोदरीयोऽपि च सङ्घवर्गः
 समेतमेनं गरिमप्रकर्षम् ।
सूरीश्वरं श्री कमलाऽभिधानं
 प्रवेशयामास पुरं तदेत्थम् ॥२६३॥

बेण्डादिवाद्यानि निनादयद्भि-
 र्नैपालपुम्भिः पुरतश्चलद्भिः ।

सौवर्णयष्टिध्वजधारिपुम्भी-
रथैस्तुरङ्गैर्बहुदन्तिराजैः ॥२६४॥

बन्दूकहस्तै नृपपत्तिभिश्च
जयध्वनिं दीर्घतरं ब्रुवद्भिः ।
श्राद्धैर्महेभ्यैर्बहुभिः समेतैः
सुश्राविकामङ्गलगीतनादैः ॥२६५॥

इत्थं महाऽऽडम्बरजातचारू-
त्सवाऽतिरेकेण पुरं प्रविष्टः ।
पयोदनिर्घोषविजित्वरेण
स्वरेण धर्मं समुपादिशत्सः ॥२६६॥

निःशङ्कविस्पष्टसुधासदृक्षं
संसारविस्ताररहरं ह्युदारम् ।
पापाऽपहारं द्रुतबोधकार-
मज्ञानतामिस्त्रमहा प्रदीपम् ॥२६७॥
श्रुत्वोपदेशं सकलाश्च सभ्याः
प्रबोधमाप्ता नियमञ्च केचित् ।

लब्धुर्महान्तो गुरुदेवपार्श्वे
धर्मे हि जैने शुभभाववन्तः ॥२६८॥
(युग्मम्)

तत्रैकदा भूपतिनाऽऽदरेण
गोष्ठ्यां समाकारित एष सूरिः ।
गत्वा नरेन्द्रं बहु भक्तिमन्तं
घटीद्वयं धर्ममुपादिशच्च ॥२६९॥

शार्दूल०

श्रीमान् गायकवाडभूपतिवरः श्रुत्वोपदेशं गुरोः
संहृष्टः समबोधतैवमसकृन्मद्यं न पेयं सताम् ।
मांसस्याऽप्यदनं विगर्हितमिदं पापस्य मूलं ध्रुवं
त्याज्यं स्वर्गतिमिच्छुभिश्च सुजनैः सुद्वंशजातैरिह

वसन्ततिलका०

आचार्यवर्य? मतिमन्? बहुशो मया हि
दृष्टा अनेकमुनिपाः सुधियः परन्तु ।

न त्वादृशः पटुवचा विजयो निरीहः
कुत्रापि नैव मयका वरसाधुरैक्षि ॥२७१॥

उप०

पुनस्त्वयेदृग्बहुपथ्यतथ्य
धर्मोपदेशाऽमृतपायनेन ।
सन्तर्पणीयः सुगुरो ? ह्यवश्यं
निःस्वार्थमेवोपकृतौ रतेन ॥२७२॥

नृपस्तदेवं बहुधा ययाचे
वटोदरीयः शुभभावयुक्तः ।
सूरीश्वरं श्रीकमलाऽभिधानं
स्तुवन् वचोभिर्मधुरैस्तदानीम् ॥२७३॥

ततो विहृत्याऽऽत्मसुशिष्यवृन्दै
रिच्छाणीपुरीमेष समाजगाम ।
पुरीप्रवेशाऽऽदि महोत्सवेन
सुसत्कृतोऽभूत् सुजनैश्च तत्र ॥२७४॥

श्रीसङ्घबह्वाग्रहतश्च तस्मिन्
बिन्द्विष्ट नन्दक्षितिवत्सरे हि ।
तस्थौ चतुर्मासमुदारबुद्धिः
श्रीयोगिराजः कमलाऽऽदिसूरिः ॥२७५॥

आगादुपाध्यायपदाऽङ्कितस्य
वीरेति नाम्ना प्रथितस्य शिष्यः ।
पन्न्यासशाली सह शिष्यवर्गै
र्दानाऽभिधानो विजयोपनामा ॥२७६॥
(युग्मम्)

व्याख्यानवाचस्पतितर्करत्न
सद्विद्यलब्ध्याख्यमुनीश्वरादि ।
शिष्यप्रशिष्यैः समुपासितस्य
श्रीमद्गुरोरस्य सुसेवनाय ॥२७७॥

वटोदराच्चापि नृपालकीयाः
सन्तः पुमांसो गुरुदेवपार्श्वे ।
सद्धर्मचर्चां विविधां विधातु
मनेकशस्तत्र पुरे समागुः ॥२७८॥

विधाय चर्चामवगत्य धर्मं
विधूतशङ्काः सकला बभूवुः ।
निशम्य चैतत्सुगुरोरमोघ
धर्मोपदेशं रुचिरं प्रसेदुः ॥२७९॥

चरित्रनेतुर्वरधीः सुशिष्य-
रत्नायितः श्रीयुतलब्धिनामा ।
द्रव्याऽनुयोगाऽश्रितसूत्रमत्र
व्याख्यानकाले समवाचयच्च ॥२८०॥

आखेटकक्रीडनकं विधातुं
योधाः कियन्तः समुपेतवन्तः ।
छायापुरीसीमनि तांश्च पौरा
आगृह्य निन्युर्गुरुदेवपार्श्वे ॥२८१॥

समागतास्ते गुरुराजमेनं
दृष्ट्वैव भीताः प्रणतिं प्रचक्रुः ।
सूरीश्वरस्तान् बहुशास्त्रपाठै
रुपादिशत्स प्रणतान् सुभीतान् ॥२८२॥

द्रुतवि०

अन्नयदानसमं वसुधातले
सुकृतमस्ति परं नहि देहिनाम् ।
अत इदं करणीयमनारतं
सकलशास्त्रसुसम्मतमुत्तमं ॥२७३॥

उप०

यं हन्ति वा खादति जीवमत्र
परत्र तं सोऽपि तथैव हत्वा ।
अश्नाति नूनं मुनिरित्यवोचत्
ततो न हन्यान्नहि भक्षयेच्च ॥२७४॥

श्रुतोपदेशाः सकलास्तदग्रे
विरागसं जीववधं कदापि ।
कुर्मश्च नेति व्रतमग्रहीषु
र्जग्मुस्ततः स्वस्य निवासमेते ॥२७५॥

व्याख्यानवाचस्पतितर्करत्ने-
त्युपाधिमाञ्छ्रीयुतलब्धिनामा ।

शश्वत्सभायां घननादनादै-
र्व्याचष्ट सूत्रार्थमपूर्वयुक्त्या ॥२०६॥

श्रोतुं जनानां हृदयाऽनुरागं
प्रवर्धयन् धार्मिकदार्ढ्य भावम् ।
निनाय धीमान् बहुशास्त्रविद्वां
स्तत्त्वार्थविज्ञापनयुक्त्यभिज्ञः ॥२०७॥

वार्धक्यमाप्तोऽपि चरित्रनेता
तीर्थान्तरीयैरपि धर्मचर्चाम् ।
कर्तुं समेतैः सह शान्तवृत्त्या
विधाय चर्चां सुचिरं सदुक्त्या ॥२०८॥

अपुस्फुरच्छासनवैजयन्तीं
प्रवादिमातङ्गकदम्बसिंहः ।
ध्वस्तीकृताऽशेषकषायवर्ग
आचार्यवर्यः कमलाख्यसूरिः ॥२०९॥

शार्दूल वि०

स्थाविर्ये समुपस्थिते मम पदं
दातुं किलाऽर्हविमौ पं० दानाऽभिधसन्मुनिः

सुमतिमान्व्याख्यानवाचस्पतिः। श्रीमाँल्लब्धिमुनी
श्वरश्च विदुषामग्रेसरःसोऽधुना सञ्चिन्त्येतिगुरुः
स्वकीयहृदये चख्यौ ततस्तौ मुनी ॥२९०॥

ज्ञातुं तत्पदमेतकावपि तदा नार्वा तदर्हाविति
प्रोचाते गुरुसन्निधौ तदपि तौ योग्यावगत्यासकौ
सत्रा सङ्घजनैर्महीवसुनिधिक्षोणीमिते हायने
मार्गे शुक्लदले तिथौ फणिपतेर्लग्ने बलिष्ठे शुभे ॥२९१

उप०

विशालशोभे वरमण्डपे पं०
श्रीदाननाम्ने विजयाय सूरिः।
सूरीत्युपाधिं ददिवानमुष्मै
प्रज्ञावते धीधनमानिताय ॥२९२॥

विद्यानिधानाय गुणाऽऽकराय
प्रज्ञावतामाद्यतमाय तस्मै।
व्याख्यानवाचस्पतितर्करत्ने
त्युपाधियुक्ताय सुवित्तमाय ॥२९३॥

गच्छस्य धुर्याय यशस्कराय
श्री लब्धिनाम्ने मुनिपुङ्गवाय ।
ददौ मुदाऽऽचार्यपदं गरिष्ठं
ससूरिमन्त्रं सह सङ्घवर्गैः ॥२९४॥

चिक्षेप वासं ह्युभयोश्च मूर्ध्नि
महात्मनोः श्रीकमलाख्यसूरिः ।
अनन्तरं सङ्घजनश्चतुर्धा
सहाऽक्षतैर्वासमुदक्षिपच्च ॥२९५॥

जयध्वनिं चाऽपि वितेनुरेते
तारस्वरैर्मोदभरेण तर्हि ।
सुश्राविकाऽऽद्या अपि गीतगाने
हर्षप्रकर्षं प्रथयाम्बभूवुः ॥२९६॥

चरित्रनेताऽप्युभयौ ततस्तौ
विपश्चितौ भूरि हितं शशास ।
सहर्षमेतावपि तस्य शिक्षा
मत्यन्तनम्रावुभकौ दधाते ॥२९७॥

उभौ ततः सूरिवराऽऽसनस्थौ
सुलाघवं सर्वसमक्षमर्हौ ।
प्रदर्श्य गम्भीरगिरा सभायाम्
धर्मोपदेशं ददतुः प्रशस्यम् ॥२९८॥

सौराष्टिका मालव धन्व देश्याः
पाञ्चालका गुर्जरसंभवाश्च ।
श्राद्धा महेभ्या बहुशः समागु
र्महोत्सवे तत्र गुरोर्महिम्ना ॥२९९॥

वसंततिलका०

ये नागतास्तदभिनन्दनपत्रिका हि
तैः प्रेषिता अभवदष्टदिनानि यावत् ।
श्रीमज्जिनेन्द्रवरपूजनकाद्यनेक
चारूत्सवः सकलपौरकृतो महीयान्

उप०

शान्त्यादिकस्नात्रमभूच्च तत्र
साधर्मिकाणां प्रतिघस्रभोज्यम् ।

प्रस्तावना श्रीफलकाऽऽदिभिश्च
निर्विघ्नमित्थं सकलं बभूव ॥३०१॥

वसंततिलका०

तत्राऽभवत्परमपावनकोपधाना-
नुष्ठानकारिभविकाऽखिलसज्जनानाम्।
रम्यस्रजां च परिधापनमात्तवर्गैः
चारूत्सवे सुविहिते भविकैश्च सर्वैः ॥३०२॥

द्रव्यश्च देव्यमभवत्प्रचितं यथेष्टं
प्रत्येकमर्त्यसदनेषु सितोपलानि।
दत्तानि शेटकमितानि कटोरिकाभिः
सार्धं महेऽत्र बहुमोदविकाशनाय ॥३०३॥

शार्दूल वि०

संघः सूर्यपुरीयकःकतिसभाभिश्चैत्य बह्वाग्रहं
कुर्वञ्छ्रीगुरुदेवमेनमसकृत्स्थातुं पयोदागमे।
नेच्छासिद्धिमयन् भवंश्च तदपि प्रान्ते हृताऽऽशःसदा
गाणीमेत्य पुनःपुरेव बहुधा विज्ञापयामासिवान्

इन्द्रवज्रा०

केनाऽपि तीव्रप्रतिबन्धकेन
पूर्वं तदभ्यर्थनमेष सूरिः ।
अमन्यमानोऽपि समागतस्य
तस्याऽतिविज्ञप्तिमुरीचकार ॥३०५॥

उप०

ततो विजह्रे कमलाख्यसूरिः
श्री दानसूरिश्रितपादपद्मः ।
व्याख्यानवाचस्पतितर्करत्न
श्रीलब्धिसूरिप्रमुखैः सुशिष्यैः ॥३०६॥

युक्तोऽधिमार्गं सुजनाननेकान्
जैनांस्तदन्यांश्च सुधासदृक्षैः ।
धर्मोपदेशैः प्रतिबोध्य सर्वैं
रत्नद्वयं त्र्यंयं समतित्यजञ्च ॥३०७॥

द्दातुंच सप्तव्यसनानि सर्वैं
दृढप्रतिज्ञां समचीकरञ्च ।

इत्थं विहारं विदधत्स सूरि
बंहूपषष्के सुरशाखिवत्सः ॥३०८॥

त्रोटकवृत्तम्

उपगच्छति सूर्यपुरं समया
कमलाख्यगुरौ सह शिष्यदलैः ।
मुदिता सुरताऽऽख्यपुरीजनता
ह्यभिवन्दितुमैच्च गुरूनतुलान् ॥३०९॥

समागतं सूर्यपुराऽधिसीमं
गरिष्ठमाचार्यममुम्प्रभासम् ।
अभूतपूर्वैर्ललितैर्महैर्हि
प्रवेशयामास पुराऽन्तरित्थम् ॥३१०॥

बेन्डाऽऽदिनानाविधवाद्यघोषै
र्ध्वजैर्महद्भिर्बहुभिः सचित्रैः ।
नेपथ्यसज्जीकृतवाजिवृन्दै
र्जयाऽऽरवैर्दीर्घतरैरनल्पैः ॥३११॥

सुश्राद्धवृन्दैरतिभूषिताऽङ्गैः
सुश्राविकाचन्द्रमुखप्रगीतैः ।

नानद्यमानैर्बहुभिश्च शङ्खैः
प्रतिस्खलाऽनुत्तमदृश्यजातैः ॥३१२॥
वीथ्यादिसद्राजपथेषु तत्र
सत्तोरणानां परिबन्धनेन ।
समस्तपुर्यां व्यदधुः प्रशस्य
महोत्सवं गौरवसम्प्रवेशे ॥३१३॥

इन्द्रवज्रा०

इत्थं प्रवेशं विदधद्गुरूणां
सौवर्णिकै राजतमौक्तिकैश्च ।
पुष्पैर्हि वर्धापनमादरेण
चक्रुः कियन्तः परमर्द्धिमन्तः ॥३१४॥
व्याख्यानवाचस्पतिलब्धिसूरि
र्गुर्वासनाऽऽसीन उदारबुद्धिः ।
श्री गौरवाऽऽदेशवशात्तदानीं
धर्मोपदेशं ददितुं प्रवृत्तः ॥३१५॥
श्रीसङ्घवर्गैः समलङ्कृतायां
तस्यां सभायां घनजित्स्वनेन ।

पीयूषतुल्याऽधिकबोधदायि-
सद्देशनाभिः सकलानतर्पीत् ॥३१६॥

उप०

चरित्रनेत्रा गुरुणोपदिष्टः
प्रावृट्चतुर्मासिकदेशनायाम्
तत्रत्यसङ्घाऽऽग्रहतश्च तत्र
द्रव्याऽनुयोगं समवाचयत्सः ॥३१७॥

इन्द्र०

श्रुत्वा तदेतत्परिदत्तचित्ताः
सम्यक्त्वदार्ढ्यं सकला अवापुः ।
धर्मप्रतिज्ञामपि भव्यजीवा
लात्वा कियन्तः कृतिनो बभूवुः ॥३१८॥

उप०

चरित्रनेतुर्विमलोपदेशा
दत्रोपधानाऽभिधसत्तपस्या ।
विशुद्धहस्ताक्षरलेखनाय
प्राचीनसंलेखितपुस्तकानाम् ॥३१९॥

प्रादुः सहस्रं शरवह्निसंख्यं
सच्छ्रेष्ठिनस्तत्र हि रूप्यकाणाम् ।
साधर्मिकाणामपि निर्धनानां
कृतेऽब्धिबिन्दुद्वयसं सहस्रं ॥३२०॥

आष्टाह्निकाः शस्ततमा बभूवु
र्महोत्सवास्तत्र पुरे कियन्तः ।
शान्त्यादिकस्नात्रमपि प्रशस्यं
साधर्मिवात्सल्यमनेकशश्च ॥३२१॥

तत्रत्यमोहम्मदराजकीयो
धीमान् कृपालुः पुलिशेन्सपेक्टरः ।
श्रुत्वोपदेशं सुगुरोरुपेत्य
दयाप्रधानं परमार्थसारम् ॥३२२॥

नद्यामियद्दूरमिते प्रदेशे
पुर्याममुष्यां नहि कोऽपि जीवः ।
मीनादि हिंस्यादिति शासनं हि
स्वयं लिखित्वा प्रथयाञ्चकार ॥३२३॥

इत्थं ह्यसौ सूरिवरः कृपालुः
सहस्रशो जीवगणाननाथान् ।
सम्पालयन्नागतवान् बुहारीं
सच्छिष्यवृन्दैः सह भूरितेजाः ॥३२४॥

पुरप्रवेशोत्सवमत्र संघ
श्चक्रे प्रशस्यं वरवादिजिष्णोः ।
सत्तेजसा भासुरविग्रहस्य
निःशेषजैनाऽम्बुजभास्करस्य ॥३२५॥

इन्द्रवज्रा०

श्रीसङ्घबह्वाग्रहहेतुनाऽत्र
द्व्यष्टग्रहेन्दुप्रमिते सुवर्षे ।
तस्थौ चतुर्मासमुदारबुद्धिः
सद्धर्मलाभं ह्यधिकं प्रदित्सुः ॥३२६॥

ज्ञात्वा निदेशं गुरुदेवकस्य
प्राज्ञः सुधीः सूर्यपुराद्विहृत्य ।

श्रीदानसूरिः कतिशिष्ययुक्त
स्तद्राजयुक्तं नगरं जगाम ॥३२७॥

उप०

श्रीमद्गुरोरस्य महोपदेशाद्
बुहारिकायामुपधाननाम ।
महातपो भूरिजनाः सुभक्त्या
ह्याराधयंश्चारुमहामहेन ॥३२८॥

शार्दूल०

व्याख्याने जनताऽऽग्रहाद्भगवतीसूत्रस्य सद्वाचना
शान्तिस्नात्रसुपूजनं च विधिना तत्राऽभवत्सूत्सवैः ।
अष्टाह्नीनमहोत्सवोऽपि सुजनैश्चक्रे महाऽऽडम्बरै
रित्थं धार्म्मिककृत्यमत्र बहुधा जातं प्रशस्यं महत्

उप०

प्रारब्धयोगात्स्थविरस्य तत्र
सूरीश्वरश्रीकमलाऽभिधस्य ।

शरीरबाधा प्रतिघस्त्रमस्य
प्रवर्धमाना विविधाऽऽपतच्च ॥३३०॥

तथापि साध्वाचरणं कदापि
नैवाऽजहात्तत्त्वविदां वरिष्ठः ।
प्रारब्धदत्तं सुखदुःखमेतद्
भोक्तव्यमेवेति जनस्य जानन् ॥३३१॥

शरीरमेतद्ध्रुवमस्त्यनित्यं
मत्वेति चित्ते तदवस्थितोऽपि ।
चक्रे शुक्लध्यानमनारतं हि
विदन् स्वकीयक्षयकालमेतम् ॥३३२॥

सर्वे च शिष्याः सततं तदीय
सेवां विधातुं परिदत्तचित्ताः ।
इभ्याऽऽदिवर्गा भिषजां वरै र्हि
चिकित्सयामासुरजस्त्रमेव ॥३३३॥

इन्द्र०

आस्तां च तत्राऽवसरे विनीतौ
श्रीदानसूरेः सुधियौ सुशिष्यौ ।

सद्विद्यकौ मङ्गलमेरुसंज्ञौ
संसेवमानौ गुरुदेवमेनम् ॥३३४॥

उप०

स्वास्थ्ये च पृष्टे गुरुदेववर्यो
मन्दस्वरै र्यत्नतरात्तदानीम् ।
अवोचदेवं क्षणभङ्गुरं हि
देहं कथं शोचथ धीरशिष्याः ॥३३५॥

इन्द्र०

नित्याऽऽत्मनि ध्यानसुदार्ढ्यकारि
सद्धर्मवाक्यं सरला इदानीम् ।
मां श्रावयेतोज्झत मोहमेवं
कालो बलीयानिति वित्त यूयम् ॥३३६॥

उप०

एकत्र घस्त्रे मयेकेव सर्वै
रवश्य मेतं परिहाय देहम् ।

गन्तव्यमेवेति सदा सयत्नैः
स्थेयं भवद्भिर्निजसाधुतायाम् ॥३३७॥

शुद्धौषधं दातुमुपागतांस्तान्
भिषग्वरानभ्यवदत्तदैवम् ।
द्रव्यात्मकव्याधिचिकित्सनं नोः ?
कुर्वन्ति वैद्या नहि कर्मरोगम् ॥३३८॥

इन्द्रवज्रा०

अध्यात्मनिष्ठस्य गुरोरमुष्य
श्रुत्वा गिरं वैद्यगणाः प्रसद्य ।
दातुञ्च भैषज्यममुं विशुद्धं
योगीन्द्रवर्यं गुरुमाग्रहीषुः ॥३३९॥

उप०

तदासनाऽऽसीनमहाविपश्चि
च्छ्रीलब्धिसूरिप्रमुखाऽऽप्तपुंसाम् ।
अत्याग्रहाद्वै चकमे तदानीं
सदौषधं पातुमसौ कथञ्चित् ॥३४०॥

इन्द्रवज्रा०

सद्वैद्यकानां विविधोपचारात्
प्रागर्जिताऽगण्यसुपुण्यतश्च ।
स्वास्थ्यं शरीरे समवाप्य किञ्चित्
तस्माद्विजह्रे गुरुदेववर्यः ॥३४१॥

उप०

वृद्धोऽप्यशक्तो बहुदुर्बलाङ्ग
स्तथापि भव्यान् नगरान्तरीयान् ।
धर्मोपदेशैः प्रतिबोधयन् हि
जवंश्च सर्वत्र सुसत्कृतः सः ॥३४२॥

प्रमिताक्षरा०

बहुशिष्यशास्त्रपटुतामुदितो
विजयाऽऽदिकः कमलसूरिगुरुः ।
ममताविमुक्त उपकारिवरो
नवसारिकापुरि समागतवान् ॥३४३॥

शार्दूल वि०

श्रीमन्तं समुपागतं गुरुवरं संसारवारं परं
श्रीसङ्घो विविधैः श्रवस्सुखकरैर्बैण्डाऽऽदिवादित्रकैः
सन्नेपथ्यविभूषितैः सुतुरगैः स्तम्बेरमैर्मृत्तरैः
सैन्यैर्बन्दुकपाणिभिश्चरुचिरं तन्वंस्तदानीं महम्॥

संख्याऽतीतमहाजनैर्जयजयारावं वितन्वानकै
र्मालातोरणबन्धनेन सुषमां बिभ्रत्सुवीथ्यादिभिः।
चन्द्राऽऽस्यै रमणीगणैस्सुमधुरं गायद्भिरत्युत्तमं
सच्चित्रध्वजधारिभिश्चपुरुषैः प्रावीविशत्सत्पुरम्॥

स्थित्वा तत्र कियद्दिनानि वरधीस्सूरीश्वरादेशतः
व्याख्यानैरमृतोपमैश्च सुजनान् संसारदुःखापहैः
सम्यक्त्वद्रढिमप्रदैर्मधुरया गम्भीरवाण्या भृशं
ह्यत्राप्सीत्सकलानसौ सुमतिमाञ्ल्लोलब्धिसूरिस्सदा

उप०

ततो विहृत्याऽऽगतवाञ्जलाल
पुर्यामसौ सूरिवरः सशिष्यः।

विज्ञप्तिबाहुल्यवशात्तदीया-
च्छमाम्बुराशिः करुणैकसिंधुः ॥३४७॥

आचार्यवृन्दाऽग्र्यतरस्य तस्य
पुरप्रवेशाय महोत्सवं हि ।
चक्रे च तत्रत्यसमस्तसङ्घो
बेण्डाऽऽदिवादित्रनिनादरम्यम् ॥३४८॥

उपाश्रयाऽऽसन्नवियद्विले हि
सञ्चैत्यमेकान्तसमाधियोग्यम् ।
स्थानं विशुद्धं जलवायुयोगं
दृष्ट्वा गुरुस्तत्र सुखेन तस्थौ ॥३४९॥

इन्द्र०

तत्राऽऽगतं सूरतवासिसंघः
आचार्यवर्यं कृशिमानमेतम् ।
ज्ञात्वा समेत्याऽऽदरतः प्रकामं
तत्र प्रयातुं बहुधाऽग्रहीत्सः ॥३५०॥

उप०

तदीयविज्ञप्तिमसौ निशम्य
चूडामणिर्निःस्पृहतामितानाम् ।
सर्वाऽऽनुकूल्यं मम वर्ततेऽस्मि-
न्नुवाच तानित्थमदभ्रबुद्धिः ॥३५१॥

पुनः स ऊचे भगवन्निदानीं
ग्रामादितस्तत्र विशाखपुर्याम् ।
भवादृशां संघटते निवासः
शरीरनैरुज्यविधापनाय ॥३५२॥

अवोचदेवं पुनरप्यसौ तान्
महापुरे चन्दनकाष्ठभारैः ।
अत्र स्थितैर्बर्बुरकैरिहत्या
धक्ष्यन्ति लोकास्तनुमुज्झिताऽसुम् ॥३५३॥

ममत्वहीनं वचनं गुरूणा
माकर्ण्य चाध्यात्मिकभावमेषाम् ।
निरीक्ष्य सर्वे मुदमापुरित्थं
विज्ञप्त्यसिद्ध्या मनसि प्रखूनाः ॥३५४॥

इन्द्रवज्रा०

भक्त्या महत्या विधिवत्प्रणम्य
चाऽऽपृच्छय सर्वं गुरुदेववर्यम् ।
कार्श्यं तदङ्गे ह्यधिकं विलोक्य
दुःखोऽजवन्तः स्वपुरं समायन् ॥३५५॥

उप०

असौ बुहारीनगरे हि यर्हि
दुःसाध्यरोगाऽधिकबाधितोऽभूत् ।
ततः प्रभृत्यैव गुरुं प्रशिष्यौ
लब्ध्याख्यसूरि र्विनयाच्च नित्यम् ॥३५६॥

आर्या०

चतुःशरणप्रपन्नं तथाऽऽतुरप्रत्याख्यानकं चाऽपि
अशुभवंश्च देशनाशतकं छद्मणभुवनविजयौ
॥३५७॥ युग्मम्

उप०

स्वास्थ्यं ततस्तस्य दिने दिने हि
हेतुं प्रभग्नं क्रमशश्च तत्र ।

तथापि नोज्झन्निजकृत्यमेष
समाधिलीनो गुरुदेववर्यः ॥३५७॥

अष्टाऽङ्कचन्द्रप्रमिते च वर्षे
माघेऽसिते तर्कतिथौ प्रभाते ।
तनावुपाधौ विविधे प्रवृद्धे
नितान्तमस्वास्थ्यमभूच्च तस्य ॥३५८॥

शोकाऽऽकुलाः शिष्यगणा अशेषा
स्तदन्तिकं तूर्णमुपेतवन्तः ।
तत्पौरसुश्रावकयूथ आगा-
च्छोकं वितन्वन् परितस्तदैव ॥३६०॥

आकारिता वैद्यवरा अनेके
कर्तुं सुलग्ना विविधोपचारम् ।
परन्तु काले समुपागतेऽस्य
सर्वोपचारा विफला बभूवुः ॥३६१॥

द्रुतवि०

अवसरे खलु तादृश आगते
सुकृतमेव भवेद्धितकृत्सताम् ।

अत इमं सकला मुनयस्तदा
परममातुरधर्ममशुश्रवन् ॥३६२॥

इन्द्रवज्रा०

संस्तारकाऽसीनगुरुर्महीयान्
अर्हन्नितिद्व्यक्षरमुच्चरन् सन् ।
धर्मं प्रशृएवन् सुसमाधियुक्तः
प्रागाद्दिवं सूरिवरः स सायम् ॥३६३॥

आचार्यवर्यस्य महीयसश्च
निर्वाणवार्तामवगत्य तत्र ।
नानापुरीयाः सुजनाः प्रजाते
प्रायःसहस्रं ह्युपतस्थिरे हि ॥३६४॥

उप०

ततोऽतिरम्ये रचिते विमाने
गुरोः शवं न्यस्य महाजना हि ।
बेएडाऽऽदिवाद्यैर्बहुशङ्खनादै
र्विमानमुद्वाह्य विनिर्ययुस्ते ॥३६५॥

विशुद्धभूमिं समुपेत्य नीचैः
शवं समुत्तार्य चितां विधाय ।
शास्त्रोक्तरीत्या घृतचन्दनाऽऽद्यैः
सर्वेऽग्निसंस्कारममुष्य चक्रुः ॥३६६॥

आमेरिकः कोऽपि समेत्य तत्र
माहात्म्यमेतस्य गुरोर्निशम्य ।
सहस्रलोकैः परितो वृतस्य
चितास्थितस्य प्रतिबिम्बमस्य ॥३६७॥

जगत्प्रसिद्धस्य महामहिम्नः
सूरीश्वरश्रीकमलाऽभिधस्य ।
ललौ च यन्त्रेण सुचित्रकारी
महाद्भुतं चेतसि मन्यमानः ॥३६८॥

तत्र स्वदेशे बहुदर्शनीय-
धर्मध्वजस्याऽस्य गरिष्ठकीर्तेः ।
चित्रं च तज्जीवनवृत्तयुक्तं
प्रैषीदनल्पाऽऽदरतः स शीघ्रम् ॥३६९॥

विशेषकम्

महीयसामत्र गतेऽपि देहे
यशःशरीरं नहि नाशमेति।
अतोऽब्धिवस्वङ्कशशिप्रमाणे
वर्षे जवाले नगरे गुरूणाम् ।।३७०।।

दिवं गतानां रमणीयमूर्ति
चितोपरि श्रीगुरुपादुके च ।
प्रतिष्ठिपेतां महता महेन
श्रीदानसूरिर्गुरुलब्धिसूरिः ।।३७१।।

महोत्सवे तत्र सहस्रशो हि
समागतानां नरनारिकाणाम् ।
जवालसंघो बहुनाऽऽदरेण
सम्भोजनाऽऽद्यैर्बहु सच्चकार ।।३७२।।

नानाप्रदेशात्समुपागताश्च
सज्झायकाः कीर्तनमण्डली च ।
विशेषसत्कारमसौ समेषां
चक्रे यथाशक्ति धनप्रदानैः ।।३७३।।

## अथ चतुर्माससंख्यानम्

शार्दूल वि०

श्रीमाञ्श्रीविजयप्रयुक्तकमलः सूरीश्वरस्तस्थिवान्
व्योमत्र्यङ्कधराऽब्दके स चतुरोमासांश्च जीरापुरे ।
अम्बालापुरि चन्द्रमोऽग्निनवभूवर्षे चतुर्मासिकां
राजाऽऽख्ये नगरे द्वाऽग्निनवभूवर्षे चतुर्मासकम्

उप०

त्रिवह्निनन्देन्दुमिते च वर्षे
भावेतियुक्ते नगरे हि तस्थौ ।
वेदाऽग्निरन्ध्रेन्दुमिते च जोध-
पुरे चतुर्मासमतिष्ठदेषः ॥३७५॥

बाणाऽग्निनन्दैकमितेऽध्यवात्सी-
दम्बेतियुग्ला नगरं स सूरिः ।
षट्त्रिग्रहेन्दौ गुजरानवालां
हयाऽग्निनिध्येकमिते च जीराम् ॥३७६॥

वस्वग्निनिध्येकमिते च वर्षे
ग्रहाऽग्निनन्देन्दुमिताऽब्दकेऽपि।
बिन्द्वब्धिरन्ध्रक्षितिवत्सरे क-
राणाऽऽख्यपुर्यां गुरुरेष तस्थौ ॥३७७॥

उप०

आसीच्च नैकोऽपि सिताम्बरीय
मूर्त्यर्चकश्राद्धजनस्य वासः।
तिस्रश्चतुर्मासिकसंस्थितीः सोऽ
करोच्च तत्राऽप्ययमेकवस्त्रः ॥३७८॥

सदैकवारं प्रतिघस्रमश्नन्
सुखेन तस्थौ विगताऽभिमानः।
कषायवर्गैः परिमुक्तभूतः
सदैव सद्ध्यानकृतौ निमग्नः ॥३७९॥

चन्द्राऽब्धिनन्दैकमिते जयाऽऽदौ
पुरे दृगब्धिग्रहभूमितेऽब्दे।

खेडापुरेऽस्थाद्वरपादलिप्ते
गुणाऽब्धिनन्दक्षितिवत्सरेऽस्थात् ॥३००॥

वेदाऽब्धिनन्देन्दुमिते च लींब
ड्याख्ये पुरे नूतयुगाऽङ्कचन्द्रे ।
मरावबात्सोत्पुरि खेरवायां
रसाऽब्धिरन्ध्रक्षितिके च दिल्ह्याम्॥३०१॥

हयाब्धिनन्दक्षितिकेच पट्ट्यां
शैलाऽब्धिनन्देन्दुमिते च वर्षे ।
समध्यवात्सीद्गुजरानवालां
संघाऽऽग्रहाच्छ्रीकमलाख्यसूरिः ॥३०२॥

नवाऽब्धिरन्ध्रेन्दुमितेऽब्दके च
सनप्रयुक्ते खतरापुरे सः ।
खनूतरन्ध्रक्षितिवत्सरे हि
तस्थौ च सूरिः पुरि कोटलायाम् ॥३०३॥

शशाऽङ्कबाणाऽङ्कधरामिताऽब्दे
नागोरपुर्यां द्विशराऽङ्कचन्द्रे ।

स पट्टणेऽस्थात् त्रिशराऽङ्कभूमौ
खम्भातपुर्यां तदनन्तरं च ॥३०४॥

युगेषुनन्देन्दुमिते च लींब
डीपत्तने पञ्चशराऽङ्कचन्द्रे ।
तस्थौ महेशाणकसत्पुरेऽसौ
वटोदरे तर्कशरग्रहेन्दौ ॥३०५॥

पुनर्द्वयेषुग्रहभूमिताऽब्दे
स पट्टणेऽस्थाद् गुरुदेववर्यः ।
सुखेन तस्थौ पुरि माणसायां
शैलेषुनन्दक्षितिसम्मितेऽब्दे ॥३०६॥

नवेषुरन्ध्रक्षितिवत्सरेऽसौ
पुरेऽमरे बिन्दुरसग्रहेन्दौ ।
वटोदरे रम्यमहेन्द्रपुर्यां
महीरसाऽङ्कक्षितिसम्मितेऽब्दे ॥३०७॥

अजीमगञ्जे द्विरसाऽङ्कचन्द्रे
गुणाऽङ्गनन्दक्षितिवर्षकेऽसौ ।

सङ्ग्रूरकराऽऽख्ये नगरे न्युवास
वेदाऽङ्गनन्दक्षितिहायने च ॥३००॥

सकोऽप्यवात्सीद् गुजरानवालां
पञ्चाऽङ्गनन्द क्षितिहायने च ।
झण्ड्यादियालानगरे महीयान्
रसाऽङ्गरन्ध्रेन्दुमिते च वर्षे ॥३०९॥

बीकाऽऽदिमन्नेरपुरेऽश्वतर्क
नवेन्दुवर्षे वरपट्टने हि ।
अष्टाऽङ्गनन्दक्षिति संख्यके च
वटोदरे शैलरसाऽङ्कभूमौ ॥३९०॥

नवाऽङ्गनागेन्दुमिते च वर्षे
खम्भातपुर्यां स्थितवान् स सूरिः ।
व्योमर्षिरन्ध्रैकमिताऽब्दके च
सीहोरपुर्यामसकावतिष्ठत् ॥३९१॥

भूवाजिनन्दाऽब्जमिते च वर्षे
स ईडरे नेत्रहयाऽङ्कचन्द्रे ।

खम्भातके वह्निहयाऽङ्कपृथ्वी
मिते च वर्षे कपडाऽऽदिवञ्जे ॥३९२॥

वेदर्षिनन्देन्दुमिते प्रवर्षे
सन्तस्थितवान् बोरसदाख्यपुर्याम् ।
पञ्चर्षिरन्ध्रक्षितिमानवर्षे
इन्नोइपुर्यां न्यवसच्च सूरिः ॥३९३॥

रसर्षिनिध्येकमिताऽब्दकेऽसौ
खम्भातकेऽस्थाज्जनतासुमान्यः ।
सप्तर्षिरन्ध्रक्षितिवत्सरे च
वटोदरे शैलहयाऽङ्कचन्द्रे ॥३९४॥

छायापुरे रन्ध्रहयाऽङ्कभूमौ
तस्थावुमेटानगरे ततश्च ।
नन्नोऽष्टनन्दक्षितिवर्षकेऽसौ
छाएयामतिष्ठत्सह शिष्यवर्गैः ॥३९५॥

चन्द्राऽष्टनन्दक्षितिहायने स
सूरिन्र्यवात्सीत्सुरते सशिष्यः ।

द्व्यष्टाऽङ्कचन्द्रप्रमिते च वर्षेऽ
तिष्ठद् बुहारी नगरे महीयान् ॥३०६॥

श्रीयुग्वैष्णववंशशेखरमणिः नारायणाचार्यवित्
जैनं शासनमुन्नतं सुकृतिनां ग्राह्यं विचिन्त्यादरात् ।
बाल्याद्धार्मिदयाविरक्ति विमलाचारेद्धविद्वद्वरम्
सूरीशं च विज्ञाढ्य चारुचरितं प्रेम्णा ह्युदश्लोकयम्

इति सद्धर्मरक्षक जैनाचार्य—
श्रीमद् विजयकमलसूरीश्वरस्य चरित्रं
* समाप्तम् *

સદ્ધર્મરક્ષક જૈનાચાર્ય શ્રીમદ્ વિજયકમલ-
સૂરીશ્વરજી મહારાજના પટ્ટપ્રદ્યોતક—



કવિકુલકિરીટ વ્યા૦ વા૦ જૈનાચાર્ય શ્રીમદ્
વિજયલબ્ધિસૂરીશ્વરજી મહારાજ.

બી. પી. પ્રેસ—પાલીતાણા.

श्री शत्रुंजयाय नमः

आचार्यमहाराजश्रीविजयकमलसूरीश्वरेभ्यो नमः

व्या० वा० कविकुलकिरीट आचार्य महाराज

श्रीमद्विजयलब्धिसूरीश्वरस्य

# संस्कृतपद्यमयं संक्षिप्तचरित्रम्.

शार्दूलवि०

श्रीमद्वीरजिनाऽङ्घ्रिपङ्कजयुगं भक्त्या नमद्गोत्रजिद्
मूर्द्धन्याऽतुलरत्नजालजटितप्रोद्भासिभूषात्विषा ।
दीप्रं भूरिजगत्यशेषसुमनोऽभीष्टाऽऽप्तिचिन्तामणिं,
नत्वैतद्रचये चरित्रमनघं श्रीलब्धिसूरीशितुः ॥ १ ॥

उद्धर्ता जगतामपारमहिमा जातो महीमण्डले,
न्यायाम्भोनिधिरद्वितीयविजयानन्दाख्यसूरीश्वरः ।
तेजिष्ठो रविवत् परीषहसहाऽनौपम्यमेवाऽगमत्,
सर्वाऽऽशाप्रसृताऽमलाऽतुलयशा वादीन्द्रकुम्भ्यङ्कुशः

मालिनी०

विजयकमलसूरिः शासनौन्नत्यकारी,
दिनकर इव मेरौ, तस्य पट्टे किलोदैत् ।
स्वपरसमयनिष्णातत्त्वविख्यातिमातः,
कृतविविधतपस्याधूतनिःशेषपापः ॥ ३ ॥
पविरिव गिरिपक्षान् वादिवृन्दाऽतिदर्पान्,
सदसि जनसमक्षं व्यच्छिनल्लीलयाऽसौ ।
गुणिजनहितकारी शुद्धचारित्रधारी,
कलुषतरुकुठारः प्राणिरक्षाप्रचारः ॥ ४ ॥

शार्दूल०

पट्टं चाऽस्य समध्युवास महिमाऽगारः सुविद्याचणः,
कारुण्याऽऽर्द्रतरः प्रज्ञाधिकवरश्चातुर्यरत्नाऽऽकरः ।
सच्चारित्रविभूषिताऽवनितलः श्रीलब्धिसूरीश्वरः,
शीलाऽलङ्कृतिमण्डितः क्षितितले सर्वत्र देदीप्यते

इन्द्र०

प्रख्यातिमद्गुर्जररम्यदेशे,
श्रीभोयणीतीर्थपतेरदूरे ।

यद्वीरमग्रामकमएरुलीये,
बालादिकं शासनपत्तनं वै ॥ ६ ॥

उपे०

सुश्रावकीयाऽखिलसद्गुणाढ्यै-
रर्हद्गुरूणां गुरुभक्तिकारैः ।
महर्द्धिकैः शीलगुणाऽभिरामैः,
श्राद्धादिलोकैः परिशोभमानम् ॥ ७ ॥
तदध्यवात्सीत्कमनीयकीर्तिः,
श्रीमालिकज्ञातिकधर्मनिष्ठः ।
सद्बुद्धिपोतांबरदासनामा,
चार्हद्गुरूपासनरक्तचित्तः ॥ ८ ॥
तद्धर्मपत्नी कमनीयरूपा,
मोतीति नाम्ना प्रथिता बभूव ।
अतुच्छबुद्धि र्निजधर्मरक्ता,
सतीप्रकाएरा गृहकृत्यदक्षा ॥ ९ ॥
व्योमाऽब्धिनन्देन्दुमिते सुवर्षे,
पौषे सिते विष्णुतिथौ बुधाह्वे ।

तदङ्गजः सूनुवरो महीयान्,
सद्गुणमन्नागेष समाविरासीत् ॥ १० ॥

तदनु गुरुमहेनाऽजायताऽस्याऽभिधानं,
परिजनपरिदत्तं लालचन्द्रेति शस्तं ।
शशिकिरण इव द्राग् वर्धमानाऽङ्गकिम्नोऽ
हरत सकलचित्तं बाललीलां वितन्वन् ॥११॥

द्रुतवि०

पितरि शैशव एव दिवंगते,
सुकृतता जननी भगिनी पितुः ।
अकृत लालनपालनमादरा-
दनवदेष च सतदशाब्दिकः ॥ १२ ॥

आख्यान०

बालोऽपि दत्ताग्रधियःप्रकर्षा-
दशेषलोकान् समतूतुषत्सः ।
विशेषविद्याऽध्ययनार्थमेनं,
पितुः स्वसा स्वीयगृहं निनाय ॥ १३ ॥

वसन्त.

तत्रैकदा कमलसूरिगुरुर्महीयान्
सच्छिष्यमण्डलवृतः पुरि माणसायाम् ।
उर्वीतलं परिपुनन् समुपाजगामै-
तद्वालचन्द्रसमुदेष्यदयप्रणुन्नः ॥ १४ ॥

उपजा.

जिनेन्द्रपूजागुरुवन्दनाऽऽदि-
सद्धर्मकृत्ये बहुरागिचित्ताम्,
श्रीलालचन्द्रो जगिनीं पितुस्ता,
मालोक्य तद्वत् तदियेष कर्तुम् ॥ १५ ॥

वंशस्थ.

ततोऽतिहृष्टो गुरुपादपङ्कजं,
मुमुक्षुजीवाऽलिगणाऽतिसेवितम् ।
ननाम चाऽऽगत्य सदैव सन्मतिः,
पपौ च तस्याऽतुलदेशनाऽमृतम् ॥ १६ ॥
सुदीप्तभालं कमनीयविग्रहं,
जगद्धितेच्छुं वसुधाविभूषणम् ।

निरीक्ष्य मेने गुरुदेव एतकं,
सुलक्षणं चापि गरिष्ठपूरुषम् ॥ १७ ॥

मालिनी०

गुरुरपि नवनीतं सद्विनीतं मुमुक्षुं,
शरणमुपगतं तं योग्यमेनं विदित्वा ।
अदित सदसि तादृग्देशनां चाऽतिरम्यां,
भवभयपरिहर्त्रीमक्षयज्ञानदात्रीम् ॥ १८ ॥

स्रग्धरा०

संसारे पुत्रदाराधनसदनकुटुम्बाऽऽदि-
यद्यद्विलोके, नात्मीयं तत्र वीक्षे कमपि
परभवे चाऽत्र वाऽऽह्लादयेद्यः ।
जाते तस्मिन्यथा मुञ्चति च नियतं
तद्विनाशेऽतिदुःखं, तारुण्यं
चापिभव्यास्तस्मिदिव चपलं नश्वरंसर्वमित्थम् ।१९।
नैके भूपा बभूवुः क्षितितलमहिताः
पाण्डवाद्याः पुरा ये, सार्धं केनाऽपि
नागात्किमपि नाहि पुनर्यातियाता न कश्चित् ।

एको धर्मः सहैति प्रथयति महिमानं
नरस्योन्नयत्र, पश्यद्भिः सर्वमेतज्
झटितिबुधवरैर्धर्म एवाऽवलम्ब्यः ॥ २० ॥

शालिनी०

सोऽयं धर्मो वीतरागोदितो यः,
स्वर्गं मोक्षं येन लोका लभन्ते ।
रक्षा यस्मिञ्जीवमात्रस्य संसा-
राकूपारं सन्तरीतुं प्रपोतः ॥ २१ ॥

धर्माद्देवाऽऽप्नोति लक्ष्मीमनन्तां,
तुङ्गे वंशे जन्मितां दीप्तिमत्ताम् ।
सौख्यं कीर्तिं पूर्णमायुश्च नूनम्,
प्रान्तेऽवश्यं मुक्तिकान्तावरत्वम् ॥ २२ ॥

ईदृग् धर्मो ह्यार्हतः कल्पवृक्षः,
सर्वश्रेष्ठः शाश्वतः सेवनीयः ।
मोक्षाऽऽकाङ्क्षावद्भिरर्हत्सु भक्तैः,
कामक्रोधाऽऽद्यन्तरङ्गाऽरिमुक्तैः ॥ २३ ॥

वसन्त०

कायेन येन कुरुते सततं ह्यनर्थं,
धर्मं जहाति रिपुतां तनुतेऽतिमूढः ।
यद्धेतवे सुतकलत्रसुभृत्यवर्गान्,
पुष्णाति सोऽपि दहने परिदह्यते हा ॥ २४ ॥

स्रग्धरा०

संसारेऽस्मिन्नसारे कुमतिकनिचये
जैनधर्मैकसारे, प्रेक्षावन्तो महान्तः
सुकृतशतरताः पापजाताऽति भीताः ।
पश्यन्तः सर्वमेकं मनसि नहि मनाग्
भेदभावं भजन्तो, मुक्ताः सर्वैश्च बन्धै-
र्जगति बहुमताः सन्ति सन्तः कियन्तः ॥ २५ ॥

यद्वद्भौमा विकारा विविधजनपदेऽने
कसंज्ञां लभन्ते, प्रान्ते सर्वं किलैकं
नहि भवति भिदा वस्तुतः कारणैक्यात् ।
एतत्तत्वं विदित्वा भवजलधिपरंपारमायान्तिधीराः,

तस्माद्धर्मं भजध्वं जिनवरगदितं संयमं वा पवित्रम् ॥
नूनं संसारमध्ये नहि किमपि सतां
सौख्यदं वर्तते हि, तारुण्यं सौख्यकृद्यत्-
तदपि तडिदिवाऽस्थास्नुतामेव यातम् ।
पुत्रस्त्रीबन्धुभृत्यद्रविणमनुदिनं क्षीयमाणं विलोके,
सर्वं तुच्छं जगत्यां भवभयलयकृद्धर्म एवाऽस्ति सत्यः

मन्दाक्रान्ता.

पायम्पायं गुरुवरमुखात्पूर्णचन्द्रात्क्षरन्तं,
सद्वैराग्याऽमृतरसमसौ लालचन्द्रो यथेच्छम् ।
आत्मोन्नत्यै परिणतमनाः संयमं सञ्जिघृक्षुः,
प्राऽयाचीत्तं मुनिवरमलं तीव्रसंवेगमाप्तः ॥२८॥

उपजाति०

उवाच चैनं सुविनीतवेषं,
त्वदीप्सितं सर्वमवश्यमेतत्,
काले विधित्सामि यदित्थमेव,
द्रक्ष्यामि ते हार्दिकभावदार्ढ्यम् ॥ २९॥
ततो जगज्जङ्गमकल्पवृक्षः,
आचार्यवर्यो विजहार तस्मात् ।

यन्माणसाया उपकण्ठमस्ति,
तत्राऽऽययौ बोरुपुरेऽतिरम्ये ॥ ३० ॥
प्राविविशत्तं गुरुणा महेन,
तत्रत्यसङ्घो गुरुभक्तिकारी ।
धर्मं चतुर्धा समुपादिशत्तान्,
प्रख्यातविद्वान् गुरुरद्वितीयः ॥ ३१ ॥
दीक्षां लीलासुः समुपेयिवान्स,
मुमुक्षुभावं परमं प्रपन्नः ।
अभ्यर्थयामास गुरुस्तदर्थं,
श्रीलालचन्द्रो गतसर्वमोहः ॥ ३२ ॥
अङ्केषुनन्दक्षितिसम्मिताब्दे,
ऊर्जेऽसिते तर्कतिथौ शुभाह्वे ।
खेटानुकूल्ये बलवन्मुहूर्ते,
महोत्सवेनैनमदीक्षयत्तम् ॥ ३३ ॥

वसन्तति०

संलब्ध-लब्धिविजयेत्यभिधानकोऽसौ,
चारित्ररत्नमधिगम्य भृशं जहर्ष ।

नाऽकिञ्चनो निधिमिवाऽसुत आप्य पुत्रं,
राज्याच्च्युतः सपदि राज्यमिव क्षितीशः ।३४।

उपजाति०

मोहादुपागत्य ततः कुटुम्बा-
श्चक्रन्दुरुच्चैर्विविधं विलेपुः ।
येनैष जीवः किल बम्भ्रमीति,
तमेव जित्वा सुखितामियर्ति ॥ ३५ ॥
तदीयवैलापिकमोहपाशोऽ-
पतन्न किञ्चिद् दृढतामुपेतः ।
आख्यच्च तानेव मनस्वबुद्धि,
न युज्यते वः खलु मोह एवम् ॥ ३६ ॥
न कोऽपि कस्याऽपि जगत्यमुष्मिन्,
सहाऽनुगन्तेति विलोकमानाः ।
मुह्यन्ति येऽस्मिन् पशुना समाना,
विवेकहीना विधिना कृतास्ते ॥ ३७ ॥
यन्मन्यते वैषयिकं हि सौख्यं,
तत्त्वस्ति तिर्यक्ष्वपि तुल्यमेव ।

तन्मोहपाशं चपलं विहाय,
धर्मे मतिर्भव्यजनै विधेया ॥ ३८ ॥

दाराऽऽदयोऽमी सकला अनित्या,
नैकोऽपि तेष्वस्ति निजः कदापि ।
तत्तेषु रागं परिहाय धीरः,
स्वश्रेयसे संयममेव लाति ॥ ३९ ॥

वसन्त.

संश्रुत्य लब्धिविजयोदितसर्वमेतन्,
मोहं तदैव सकलं परिमुच्य सर्वे ।
नत्वा समस्तमुनिमण्डलमुच्चभक्त्या,
प्राजग्मुरात्मनिलयं मुदिताशयास्ते ॥ ४० ॥

( चरित्रनेतुरभ्यासोऽपूर्वदेशनाशक्तिश्च. )

उपजाति०

समात्तदीक्षो गुरुपादपद्मं,
जोजुष्यमाणो विनयाऽवनम्रः ।
सोऽधीत्य साधव्यसमस्तकर्म,
ग्रन्थांस्ततो व्याकरणं पपाठ. ॥ ४१ ॥

गुरोर्नियोगे सतताऽधिवासी,
प्राचीननव्यद्वितयं च तर्के ।
काव्यानि कोशानपि पिङ्गलाऽऽदि,
ग्रन्थान् समध्यैष्ट विशालबुद्धिः ॥ ४२ ॥

बाणाऽब्धिजैनागमसूत्रकाव्या-
लङ्कारचम्पूप्रभृतीनधीत्य ।
पातञ्जले ज्योतिषि कापिलाऽऽदा-
वयं बभूवान् भुवि चाऽद्वितीयः ॥ ४३ ॥

गङ्गाप्रवाहाऽनुकृतिं दधानां,
निरीक्षयन्तः सुधियो महान्तः ।
गीर्वाणभाषाऽस्खलितोक्तिमस्य,
स्वान्ते किलाऽऽपुर्महदद्भुतत्वम् ॥ ४४ ॥

पृथ्वी०

समेतशिखरं ततः सगुरुमण्डलीमण्डितो,
यियासुरमलाशयः परमतीर्थमालोकितुम् ।
वटोदरनिवसिना सुकृतशालिसब्रेष्ठिना,
प्रसिद्धमगशीरपूःस्थितजिनेशकामेयतः ॥४५॥

पंचचामरं०

अचालि सङ्घ आदरात्तमाशु पेदिवानयं,
अदभ्रवङ्ग वासिभिः पलाऽदनं प्रहापयन् ।
अनेकशास्त्रयुक्तितः समस्तसङ्घमानितः
सुखेन तत्र सङ्गतः प्रभुं ननाम भक्तितः ॥४६॥

ततो विहृत्याऽऽगतवान् स सूरि
रजीमगञ्जाभिध सत्पुरेहि ।
सङ्घाग्रहात्तत्र सुखेन तस्थौ
प्रावृट् चतुर्मासमसौ महीयान् ॥ ४७ ॥

ततो विहृत्य सद्गुरुः स्वशिष्यमण्डलीयुतः
पथिक्रमाऽऽग्रतः पुरे जनान् बहूंश्च बोधयन् ।
समाजगाम लश्करं महेभ्यवृन्दभासुरं,
पुरप्रवेशमुत्सवं महत्तरं विलोकयन् ॥ ४८ ॥

इंद्रवज्रा०

पञ्चालसङ्घः समुपेत्य तत्र
विद्यानिधिं श्रीकमलादिसूरिम्
भक्त्याऽभिवन्द्याऽधिकदीप्तिमन्तं
तत्र प्रयातुं भृशमाग्रहीत्सः ॥ ४९ ॥

स्रग्धरा०

स्वामिन्? देशे मदीये भवति बहुतरो
धर्महानिः समेषां ।
नैकेधर्मान्तरीयाः प्रतिनगरमथो
निस्तृणन्ति स्वधर्मम् ॥
तूर्णं तत्र प्रयाहि प्रभुवर? सकलान्
पाहि नस्त्वंप्रपन्नान्,
ग्रीष्मेसूर्यांशुतप्ताजलदमिव जनाः
कामयन्ते भवन्तम् ॥ ५० ॥

चातुर्मास्यं च तत्राऽऽवस कुरु,
जनताऽज्ञानतानाशमाशु, ।
तेनेत्थं पार्थ्यमानो गुरुरपि बहुधा
धर्मलाभं विदित्वा ॥
शश्वद्धर्मोपकर्त्ताशररसनवभू-
संख्यके वैक्रमेऽब्दे, ।
तत्राऽऽयातःसशिष्यःपरमततिमिरो-
च्छेदकारीदिनेशः ॥ ५१ ॥

इन्द्रवज्रा०

देशे च तस्मिन् गुजरानवाला,
स्यालाऽऽदिमुल्तानकरोपमाऽऽदि ।
मुख्येषु मुख्येषु च पत्तनेषु,
कृत्वा चतुर्मासिकसंस्थितिं सः ॥ ५२ ॥
उपादिशच्चाऽऽर्हतशुद्धधर्मं,
भव्यांश्च सर्वान् सममूमुदत्सः ।
पाखण्डिकानां कुमतानि कृन्तन् ,
धर्मोन्नतिं भूरितरां व्यधत्त ॥ ५३ ॥

उपजाति०

शेषे च काले विकटं विहारं,कुर्वन्नखेदं नगरान्तरादौ ।
जैनैस्तदन्यैर्बहुधोपदेशैः,सर्वं हिंसावद्यमजीहपत्सः ५४
चरित्रनेतुर्मधुपाकतुल्यं,व्याख्यानमाकर्ण्य मुदं वहन्तः
निशाऽशनाज्जीवविराधनादि,पापाद्विरेमुःपरधर्मिणोऽपि
पलाण्डुनंमद्यनिषेवणादि,राजन्यकाऽऽद्युत्तमजातिमद्भिः
अमोघसद्धर्म्यनिजोपदेशैं,रतित्यजद्भिश्चजनीनएषः ५६

चक्रे च तस्मिँल्लुधिआन नाम,
मुल्तानकादिप्रचुरासु पूर्षु ।
चरित्रनेता स्वकराऽम्बुजेन,
सूरिप्रतिष्ठाऽऽदिकधर्मकृत्यम् ॥ ५७ ॥

प्राग् यत्र मूल्यं पल्लशेटकस्य,
षण्णाणकं क्रेतृजनाऽधिकत्वात् ।
आसीदिदानीं तदसूच्च तत्राऽऽ-
णकत्रयं क्रेतृजनाऽल्पकत्वात् ॥ ५८ ॥

दिगम्बरीयै विबुधप्रकाण्डैः
सत्राऽत्र जाताऽधिसन्नं चिराय, ।
चर्चा गरिष्ठा जनरञ्जनाय,
स्वाम्नाय संस्थापनहेतवे च ॥ ५९ ॥

वादिद्विपेन्द्राऽङ्कुश एष नाना,
जैनाऽऽगमाऽनुत्तरसत्प्रमाणैः ।
मतं तदीयं परिखण्ड्य सर्वा,
नजेजयीत् सिंह इव द्विपेन्द्रान् ॥ ६० ॥

ग्रामान्तरे चाऽऽर्यसमाजविद्वद्,
वेदान्ततर्काऽऽदिकशास्त्रविद्भिः ।
विधाय चर्चां सुचिरं स्वकीय,
मर्हन्मतं सुस्थिरयाञ्चकार ॥ ६१ ॥

उपजाति०

एलाऽदनं तैरधिकारिपुम्भि,
रतित्यजत्स्वीयमहोपदेशैः ।
आखेटदीव्यज्जनबन्दुकाऽस्त्र,
मतुत्रुटच्चापिसन्नासमक्षम् ॥ ६२ ॥

धर्मानुरागी करसंग्रहीता,
व्याख्यानमेकं सदसि प्रयातः ।
निशम्य गेहस्थितवध्यजीवान्,
नैकप्रभेदानजहात्तदैव ॥ ६३ ॥

आर्या०

रचयामास तत्रैव, दयानंदकुतर्कतिमिरतरणिं च ।
कुमततरुकुञ्जरोऽसावविद्याऽन्धकारमार्तण्डम् ॥ ६४ ॥

उपजाति०

अपुस्फुरत्तत्र जयध्वजं स ,
　　विशालपंचालकसर्वपुर्याम् ।
सद्वादिदन्तावलकुम्भभेदा,
　　दुद्भूतमत्यद्भुतमर्हणीयः ॥ ६५ ॥

मुख्यस्वशिष्येण सुसंयताऽऽत्मा,
　　गम्भीरनाम्ना मुनिना सहाऽसौ ।
गुरोर्निदेशाद्विहरन्ननैक-
　　प्रशस्यकृत्यानि विधाय तूर्णम् ॥ ६६ ॥

व्यतीतनच्चन्द्रमरीचिगौरीं,
　　महीयसीं सर्वजनप्रशस्याम् ।
सर्वासु दिक्षु प्रसृतीभवन्तीं,
　　कीर्तिं निजामात्तगुरुप्रतिष्ठः ॥ ६७ ॥

प्रख्यातिमगान्महनीयकीर्ते,
　　श्चरित्रनेतुर्विबुधोत्तमस्य, ।
जगत्पुनानं शुभनामधेयं,
　　रत्नत्रयीभूषितविग्रहस्य ॥ ६८ ॥

समागमद् गुर्जरदेशतो हि,
विद्वद्वराणां महतां मुनीनाम् ।
अग्रेसराणां वणिजां प्रशस्ति–
पत्रं चरित्राऽधिपतेःकराब्जे ॥ ६९ ॥

अथाऽऽगतो गौरवपूज्यपाद–
सत्कल्पवृक्षं श्रयितुं जवेन ।
रूपाख्यपुर्यां चिरदर्शनोत्को,
जरीहृषीतिस्म गुरून्प्रणम्य ॥ ७० ॥

गुर्वाज्ञया मेघगभीरनादैः,
सुधासमां धार्मिकदेशना हि ।
प्रारब्ध सर्वाऽऽगमसारवक्ता,
चरित्रनेताऽद्भुत शक्तिधर्ता ॥ ७१ ॥

स्वशिष्यरत्नस्य सुदेशनाऽपि
जयादिवार्ताश्रवणेन चाऽसौ ।
निःसीममानन्दमुवाह चित्ते,
बह्वाशिषा तं गुरुरैदिधच्च ॥ ७२ ॥

तत्रैडरीयाऽऽगतसंघबह्वा-
ग्रहेण सूरिर्लघु संविहृत्य ।
प्रमोदभागीडरपत्तनेऽसा-
वुपाययौ शिष्यगणैरुपेतः ॥ ७३ ॥

पुरप्रवेशाय गुरोरमुष्य,
सत्तोरणाद्यै र्नगरी मशेषाम् ।
सम्भूष्य नानावरवाद्यनादै-
र्महोत्सवं तत्र ततान संघः ॥ ७४ ॥

अथ प्रणुन्नो गुरुणाऽति हृष्ट-
श्चरित्रनेता बहुवाग्मितावान् ।
जीमूतनिस्वानसमाननादैः,
सद्देशनामारभताऽतिरम्याम् ॥ ७५ ॥

तद्वक्त्रपूर्णेन्दुगलत्सुधाय-
मानां निपीयाऽतुलदेशनां तैः ।
सङ्घैः समस्तै र्नितरां प्रसन्नै-
रभ्यर्थितः श्रीकमलादिसूरिः ॥ ७६ ॥

षन्द्रर्षिनन्देन्दुमिते सुवर्षे,
समस्तसंघाऽनुमतं सभायाम् ।
"व्याख्यनवाचस्पति" जैनरत्ने-
त्युपाधिमस्मा अदितोत्सवेन ॥ ७७ ॥

द्रुतवि०

विरचिता वरमेरुत्रयोदशी,
सरलसंकृतपद्यमयी कथा ।
इह हि रम्यपुरे वसताऽमुना,
ऋजुधियामुपकारचिकोर्षता ॥ ७८ ॥

मालिनी०

तदनुगुरुपदाब्जे भृङ्गलीलां वितन्वन्,
प्रतिपुरमुपकुर्वन् रम्यधर्मोपदेशैः ।
दहनमुनिनवेन्दौ वत्सरे प्रौढतेजाः,
इहकिहि नरसएमापत्त नं चाऽऽपदेषः ॥७९॥
जलधर इव तोयं प्रावृषेण्यो महीयान्,
परिषदि सुजनानां देशनां प्रत्यहं सः ।
विविधनवसुजाताऽघौघमुच्छेदयन्तीं,
शिवनगरसुमार्गं दर्शयन्तीं मुमुक्षून् ॥८०॥

दददयमखिलानां मोदयन्मानसानि,
दिनकर इव नैशं ध्वान्तमज्ञानपुञ्जम् ।
हृदयसदनसुस्थं तत्क्षणं नाशयित्वा,
सकलजिनसमुक्तं धर्ममावेदयत्तान् ७०युग्मम्

उपजाति.

धर्मं चतुर्धा दशधा च तत्र,
मतान्तरीया अपि पौरलोकाः ।
समुत्सुका एत्य सुखेन नित्य,
माकर्णयामासुरनल्पजल्पया ॥ ७२ ॥
तत्रैकदा ह्यार्यसमाजवर्गा
प्रसिद्धविद्वांस मनन्त कृष्णम् ।
आकार्य शीघ्रं नगरान्तरस्थं
चर्चाचिकीर्षा प्रथयांबभूवुः ॥७३॥
अश्मादिऽऽदेवप्रतिमासु पूजा
मुक्ताऽऽत्मजीवाऽऽगमनोपरिष्टात् ।
शास्त्रार्थमारब्ध सत्नामुपेत
श्चरित्रनेत्रा गुरुणा समं सः ॥७४॥

आसंस्तदानीं नडियादपुर्या-
ध्यनेकसद्‌ग्रामनिवासिलोकाः ।
तेषां समक्षं मुनिराजएष
ह्यखण्ड्यभूयिष्ठगरिष्ठसुक्त्या ॥७५॥

पक्षं तदीयं परिखण्ड्य सर्वं
नीरुत्तरीकृत्य विवादिनं तम् ।
सज्जैनधर्मीयजयध्वजं हि
प्रस्फारयन् कीर्तिमतीव लेभे ॥७६॥

ततो विहारक्रमिकप्रयाणै-
र्निजाङ्घ्रिविन्यासविपूतगोत्रः ।
वेदर्षिनन्दैकमिताब्दकेऽसौ
वटादरायां पुरि सम्प्रयातः ॥७७॥

अत्राऽप्यमुष्यह्यभवन्मुकुन्दाऽऽ-
श्रमेण सन्न्यासिवरेण सार्धम् ।
चर्चा सभायां दिवसत्रयं हि
पक्षद्वयीसज्जनमण्डितायाम् ॥७८॥

सैद्धान्तिकाऽनेकबिशेषपाठै-
नानाऽनुमानैर्विविधैश्चतर्कैः ।
निरुत्तरं वादिनमेष कृत्वा
ह्यमानि तेनापि च जैनधर्मः ॥७९॥

विजित्य संन्यासिनमाजगाम
समुद्भूताऽनेकयशःश्रियाऽऽढ्यः ।
इन्दोरपुर्यां सह शिष्यवर्गै-
रपारधामा श्रुतपारदृश्वा ॥८०॥

शरर्षिनन्दक्षितिमानवर्षेऽवात्सीत्
पुरेऽस्मिन् सकलाऽऽग्रहेण ।
प्रावृट् चतुर्मासमसौमुनीन्द्रः
संसारदुर्न्यायमहीध्रवज्रः ॥८१॥

शार्दूल०

देवद्रव्यविनाशनाय मनुजा धर्मोज्झिता येऽधमाः
शास्त्रातिप्रतिकूलगर्हिततमां नव्यां प्रवृत्तिं व्यधुः ।
तेषां पक्षसमुच्छिदे जिनमहाऽनेकप्रमाणाऽऽकुलं,
देवद्रव्ययुतादिसिद्धि बिदधे तत्रैव सत्पुस्तकम्

उपजाति०

अथाऽऽगमद्गुर्जरदेशमध्ये,

वटोदरा बोरसदाभिधान-

[1]ताम्रावतीच्छाणिपुरादिकेषु

सह व्यहार्षीद्गुरुभिः किलाऽयम् ॥९३॥

भुजङ्ग०

चतुर्मासिकं वासमेतेषु कृत्वा

जनान् पाययित्वा सुधादेशनौघम् ।

भवाम्भोधिमध्यादुदातीतरत् तान्

महात्मा जितात्मा कृपालुः शरण्यः ॥९४॥

पुष्पिताग्रा०

सकलभविकबोधिबीजदानं,

ह्यकृत दयानिधिरार्त्तपालकोऽसौ ।

यमनियमशमाऽऽदिशोभमानः

कलुषततिप्रतिघातहेतुरेषः ॥९५॥

विविधसुकृतबुद्धिरेषु जाता

भवभयहारिमहोपदेशतश्च ।

---

१ खंभात.

अतिशयमहिमानमीयुषोऽस्य
परमपवित्रचरित्रधारकस्य ॥९६॥

वसन्त.

आदिष्ट एष गुरुभिश्चलितः स्वशिष्यैः
शत्रुञ्जयाऽऽदिगुरुतीर्थचिकीर्मनीषी ।
मार्गाऽधियातबहुपत्तनपौरलोकान्
धर्मोपदेशपटलैर्बहुधोपकुर्वन् ॥९७॥

सिद्धाऽचलं सार्धमशेषशिष्यै
रागत्यतीर्थेशमनन्तभक्त्या ।
नत्वा च नुत्वा गतवान् विहृत्य,
सद्रैवताद्रिप्रविलोकनार्थम् ॥९८॥

गीती०

समेत्य तमचलमचिरं,
प्रणनाम तीर्थनाथं गुरुभक्त्या ।
तस्माद्विहृत्य मुदितो
राधनपुरमाजगाम गुरुरेषः ॥९९॥

वंशस्थ.

समागतस्याऽस्य विशिष्टसद्गुरो
रनेकशास्त्रेषु पटीयसः प्रभोः ।
प्रवर्षतो रम्यसुधर्म्मदेशना-
ऽमृतानि वर्षर्तुघनस्य तुल्यकम् ॥१००॥
पुरप्रवेशार्थमपूर्वमुत्सवं
व्यधत्त तत्रत्यमहर्द्धिसङ्घकः ।
मृदंगबेन्डाऽऽदिकवाद्यवादनै-
र्वधूजनाऽऽरब्धसुहारिगायनैः ॥१०१॥

उपजाति०

श्रीसङ्घबह्वाग्रहहेतुनाऽसौ
चक्रे चातुर्मासमिह प्रविद्वान् ।
श्रीनन्दिसूत्रं समशिश्रवच्च
जैनांस्तदन्यान् समितानसङ्ख्यान् ॥१०२॥
प्रभावना नित्यमनेकवस्तुभि
र्जिनेन्द्रपूजा विविधप्रकारा ।
स्वधर्मिवात्सल्यमनेकधाऽभू
च्छ्रीमद्गुरोरस्य महोपदेशात् ॥१०३॥

स्त्रियः पुमांसश्च महान्तमत्र
    भावं समीयुः परिशुद्धभावैः ।
सूत्रार्थमेतस्य चरित्रनेतु-
    र्मुखारविन्देन निशम्य सम्यक् ॥१०४॥

दुतवि०

विहरमाण इतो नगरादिषु
    पथिजनान् भविकान् प्रतिबोधयन्
सह विनेयगणैर्वरपत्तनं,
पुरमगादनघीकृतभूचरः ॥१०५॥

शिखरिणी०

समेतस्याऽकार्षीज्झटिति जनता हृष्टमनसा ।
प्रवेशे सत्पुर्या युवतीजनगीतैः सुललितैः ।
अशेषैः सद्वाद्यैर्जयजयजयाऽऽरावमिलितै-
र्निनादैश्शङ्खानां परममहमेतद्वरगुरोः ॥१०६॥

उपजाति०

इत्थं महाऽऽडम्बरतः प्रवेशं
    कुर्वन्नशेषैः परिणूयमानः ।

उपाश्रयं रम्यविशालमेत्य
सद्देशनां माङ्गलिकीं ततान ॥१०७॥

संसारकान्तारसुनिर्ययासु-
जव्यात्मनां सार्थपतीयमानां
मोहान्धकारक्षतिघस्रकृत्त्वां
तद्देशनां सर्वजना अशृण्वन् ॥१०८॥

आसीच्च यस्तत्र पुरातनो हि
मिथो विरोधो बहुहानिकारी।
अधीप्रधानोऽयममुं विहाप्य
सर्वैक्यतामोदजरं व्यतानीत् ॥१०९॥

उपजाति०

ततो विहृत्याऽऽगमदेषशुद्ध-
धियां वरेण्यः सुरजाऽभिधानम्
पुरं गरिष्ठं महता महेन
पुरप्रवेशो विहितेन पौरैः ॥११०॥

सद्देशनाऽपूर्वसुधातिवृष्टिं
कृत्वाऽब्दवत्सर्वजनस्य चित्ते।

सम्यक्त्ववृक्षाऽङ्कुरमेधयित्वा
सन्तर्पयामास समस्तसञ्घान् ॥१११॥

कटोसणाऽधीश्वरतस्ततसिंहे-
न प्रेषितं प्रार्थनपत्रमेकं ।
विहर्तुमेतद्दिशि शीघ्रमेव
समागमत्तत्रगुरोरमुष्य ॥११२॥

विज्ञप्तिपत्रं बहुभक्तिपूर्णं
सम्प्रश्रयाऽऽढ्यं वरधीरुदारः ।
तद्वाचयित्वा विजहार तस्मात्
सद्धर्मकृत्याऽऽदिकलाभहेतोः ॥११३॥

ततःसमायिष्ट सुसंयमीन्द्र-
स्तत्पत्तनं शिष्यसमाजजुष्टः ।
केकीव मेघाऽऽगमनं निरीक्ष्य
जरीहृषीतिस्म स ठक्कुरो हि ॥११४॥

सज्जन्ययात्रां विरचय्य मंक्षु
भेर्यादिनानाविधरम्यवाद्यैः ।

चतुर्विधैः सैन्यदलैश्च सज्जै-
रभ्याययौ सम्मुखमस्य नेतुम् ॥११५॥
भक्त्याऽभिवन्द्याऽखिलतापहारं
चरित्रिणामाद्यममुं गुरुं सः ॥
शंखान् धमद्भिर्जयमुच्चरद्भिः
प्रावीविशत्स्वं पुरमेनमित्थम् ॥११६॥
सद्देशनामस्य दयाप्रधानां
संसारविस्तारहरीममोधाम् ।
शृण्वन्नजस्रं गुरुपार्श्वमित्वा
प्रबोधमाप्नोद्वरठक्कुरः सः ॥११७॥

शार्दूल०

मद्ग्रामेष्वखिलेषुकोऽपिमनुजःपर्यूषणापर्वणि
चाऽऽश्वीये नवरात्रकेऽप्यसुमतां कर्ता वधं यःकुधीः।
दण्ड्यःसोऽपिभविष्यतीहमयकाप्रत्यब्दमेतद्ध्रुवं
श्रीमच्छ्रीगुरुसन्निधौनियमनंचक्रेदयालूभवन्॥११८॥

उपजाति०

स्वकीयहस्ताक्षरशोभमानं
प्रमाणपत्रं प्रथयाञ्चकार ।

प्रादत्त जीवेष्वभयं तदित्थं,
गुरूपदेशाच्चबुधकृत्यकारी ॥११९॥

शालिनी०

तन्वन्नेवं प्राणिरक्षां मुनीन्द्रः
स्वीयै रम्यैःशुद्धधर्मोपदेशैः ।
भव्याञ्जीवान् प्रत्यहं बोधमानः
वाणीग्रामं प्रापदत्युग्रतेजाः ॥१२०॥

उपजाति०

व्योमाष्टनिध्येकमितप्रवर्षे
सम्प्रार्थितोऽशेषमहेभ्यवर्गैः ।
चक्रे चतुर्मासनिवासमस्मिन्
सुपूजनीयैर्गुरुभिः सहैषः ॥१२१॥

वसंत०

तत्राऽऽगमत् सुरपुरीगतवाचकश्री-
मद्धीरवीरविजयस्य सुशिष्यरत्नम् ।
पंन्यास दानविजयः कमलादिसूरे
रत्यन्तकर्मठतताऽतुलकीर्तिकस्य ॥१२२॥

स्रगधरा०

पन्न्यासो दाननामा तदुचितमुनिनाऽ-
चीकरत्सन्मुहूर्ते, पार्श्वेस्थित्वाऽमुनाऽसौ
सविधि ऽगवतीसूत्रयोगाधिवाहं ।
वृद्धाऽवस्थागतत्वात् झटिति तदुचितं
स्वीयपट्टे निषाद्य शश्वद्ध्यानंविदध्या-
मिति निजहृदये चाऽवदध्रे च सूरिः ॥१२३॥

उपजाति.

सूरीश्वरस्तौ सुविदौ तदर्हौ
निजाऽभिलाषं कथयांचकार
व्याख्यानवाचस्पतितर्करत्ने-
त्युपाधिमाँल्लब्धिधरियेष तत्र ॥१२४॥
विद्वानशेषागममर्मवेदी
पन्न्यासधारी विजयाऽग्रदानः ।
श्रुत्वा गुरुणां वचनं तदानीं
चकाङ्क्ष नैतद्गदितोऽपि भूयः ॥१२५॥
तथाऽपि तद्दातुमसावभूज्यां
नैवाऽजहात् सावकतद्विचारम् ।

गुर्वन्तिके शिष्यगणो विनीतो
नैवेहते किंचिदपीह यस्मात् ॥१२६॥
छाणीस्थसङ्घोऽपि गुरोरमुष्य
विज्ञाय तच्छ्रेष्ठतमं विचारम् ।
आचार्यमागत्य जगाद हृष्टः
स्वामिन्? करिष्ये महमत्र तस्य ॥१२७॥
ततश्च तावप्यतिवृद्धमान्याऽऽ
चार्यीयमादेशमलङ्घनीयम् ।
स्वीचक्रतुः सङ्घजनोऽथ शीघ्रं
कार्यद्वयार्थं महमाततान ॥१२८॥
पदप्रदानं ह्युभयोर्महिष्ठ
मुन्योःसुविद्वद्वरयोः कृपाल्वोः ।
स्वर्गाऽपवर्गप्रदसूपधान-
सुमालिकानां परिधापनं च ॥१२९॥

वंशस्थ०

ततः प्रतिग्राममदत्त पत्रिकाः
सुकुङ्कुमाक्ताः कमनीयमुद्रिताः !

समागमन् नैकपुरेभ्य उत्सुका
अमेयसङ्ख्येयविशेषभावुकाः ॥१३०॥

पुष्पिताग्रा०

सुललितवरघोटको महेऽस्मिन्
नदति समस्तविशेषवाद्यवृन्दे
निरगमदतिहारिवेषिपुंस्को
विधुवदनाललनाऽनुगम्यमानः ॥१३१॥

उपजाति०

संख्याऽतिगाऽऽसीज्जनता समेता
तत्रोत्सवे भूरिधनव्ययेन ।
चेक्रीयमाणे सुकृतेप्सुसङ्घैः
समागताऽशेषजनाऽतिनुत्ये ॥१३२॥
[1]चन्द्राऽद्रिनिध्येकमिताऽब्दकीये
सहःसिते नागतिथौ प्रजाते ।
लग्ने स्थिरे सद्ग्रहपूर्णदृष्टे
प्रौढप्रतापी यमिनां वरिष्ठः ॥१३३॥

---

१ १९८१.

आचार्यवर्यः कमलादिसूरि-
राचार्यमत्युच्चपदं तदाऽऽख्याम् ।
नृरत्नकाभ्यामददात्सुविद्भ्यां
स्वगच्छभारोद्वहनक्षमाभ्याम् ॥१३४॥

सौराष्ट्रपञ्चालककच्छधन्व
सगुर्जरीयाऽऽगतदाक्षिणात्याः ।
साहस्त्रिका भूरि मुदं दधाना
व्यतानिषुः प्रोच्चजयध्वनिं ते ॥१३५॥

प्रदाय चाऽऽचार्यपदं प्रहृष्ट
श्चरित्रनेतारममुं सुशीलम् ।
न्यसीसदत्स्वीयगरिष्ठपट्टे
गच्छाऽऽधिपत्यं व्यतरच्च सूरिः ॥१३६॥

निर्विघ्नमित्थं समुपाद्यमुष्य
समस्त जैनाऽम्बुजभास्करस्य ।
भवाऽब्धिमज्जज्जनतारकस्य
सूर्यासनाऽऽरोहणसूत्सवो हि ॥१३७॥

द्रुतविलंबित०

कमलसूरिगुरोःकरपङ्कजे
स्ववसरोचितकृत्यविधायिनः ।
परमहार्दिकहर्षभरोज्वलं,
ह्यवसरे किल तत्र विदेशतः ॥१३८॥
सुमनसामनुपस्थितिमीयुषां
सुयमिनां कियतां गृहमेधिनाम् ।
तदभिनन्दनपत्रमुपागमत्
प्रचुरवैद्युतपत्रमपि द्रुतम् ॥१३९॥ युग्मम्
तदनुसूरिपदेन विभूषित
श्चिरमनल्पततस्त्यजनाऽऽग्रहात् ।
अभियियौ स हि सूर्यपुरं वरं
सगुरुको बहुमौनगणैर्वृतः ॥१४०॥

उपजाति०

अथोपयातं नगरोपकण्ठं
वितत्य सङ्घोऽपि महं महन्तम् ।
प्रावीविशत् स्वंपुरमर्हणीयं
विशिष्टवादित्रनिनादपूर्वम् ॥१४१॥

व्याख्यानपीयूषमपूर्वमेष
सम्पाद्य सङ्घं सकलं यथेच्छम् ।
सद्बोधिबीजोद्गमनैकहेतुं
श्री लब्धिसूरिः समतीतृपद्धि ॥१४२॥

श्रीवीतरागोदितधर्मतत्त्वं
प्रत्याहिकीर्त्तिर्निजदेशनाभिः ।
अवीविदद्भव्यजनानशेषान्
अचीरकरद्धार्मिकनैककृत्यम् ॥१४३॥

एतत्समीपस्थबुहारिपुर्यां
समाययौ द्व्यष्टनवेन्दुवर्षे ।
चक्रे चतुर्मासनिवासमस्मि
न्नत्याग्रहात्संघजनस्य सूरिः ॥१४४॥

शार्दूल०

अत्राऽवाचि जनाऽऽग्रहाद्भगवतीसूत्रं महापुण्यदं
लोकानां समुपस्थिति प्रतिदिनं पुंसां वधूनां बहुः ।
श्रुत्वा श्रोत्रसुखं गुरोरनुपमंव्याख्यानमत्यादरात्
स्वं धन्यं परिमेनिरे बुबुधिरे धर्मस्य तत्त्वं समे ॥१४५॥

उपजाति०

तदन्तिकाऽशेषसुपत्तनेषु
विहृत्य लोकान्बहुधोपकुर्वन् ।
नयाऽऽदिसारीनगरोपवर्ति
जवालपुर्यामथमाजगाम ॥१४६॥

इहृत्यलोकाऽतुलभक्तिभाव
मुपाश्रयाऽन्यर्णजिनालयादि-
सर्वाऽऽनुकूल्यं प्रविलोक्य सूर्य
पुरीयविज्ञप्तिमुपेत्य तस्मिन् ॥१४७॥

सङ्घाऽऽग्रहाच्छ्रीकमलाऽऽदिसूरिः
सुखेन तस्थौ कियतो दिनानि ।
चरित्रनेता गुरुपादसेवां
कुर्वन्ददौ धार्मिकदेशनां च ॥१४८॥ युग्मम्

द्रुतविलम्बित०

कमलसूरिगुरोर्जरयोत्थितं
शरमुनिप्रमिताऽऽब्दमुपेयुषः ।
प्रतिदिनं ववृधे तनुबाधनं
तदपि नैव जहौ निजकर्म सः ॥१४९॥

उपजाति०

कालं समेतं ह्यवगत्य लक्षणैः
सदैव सद्ध्यानमसौ विधातुम् ।
प्रववृते योगिवरो विमोहः
स्वश्रेयसे निर्मलकान्तिभाक् सः ॥१५०॥

*गुणाष्ट–नन्द–क्षितिवत्सरीये
माघेऽसिते गौरतिथौ निशादौ ।
समाधिना कायममुं विहाय
दिवं जगामाऽतुलसौख्यमीप्सुः ॥१५१॥

निर्वाणमाप्ते सुगुरावमुष्मिन्
परोपकर्तृप्रथमे जगत्याम् ।
शोकान्धकारः सहसैव लोके
समाविरासीदनिवारणीयः ॥१५२॥

दिव्यं विमानं विरचय्य तत्र
शवं तदीयं विनिधाय भक्त्या ।
महोत्सवेनैतदशेषलोका
उद्वाह्य निन्युर्विधिना श्मशाने ॥१५३॥

---

* १९८३.

चरित्रनेता तत एष सूप-
देशैरमोघैः पुरवासिसङ्घैः ।
छत्रीं सुरम्यां निरमीमपत्तैः
चितोपरिष्टात्कमनीयशैलैः ॥१५८॥

तस्यां सुचैत्येऽपि च सद्गुरूणां
बिम्बं सुभव्यं वरपादुके हि ।
अतिष्ठपच्चारुमहामहेन
समागताऽसंख्यजनेषु सत्सु ॥१५९॥

×त्र्यष्टाऽङ्कपृथ्वीमितहायनेऽसा
वध्यूषिवान् सूर्यपुरं सशिष्यः ।
वर्षर्तुकालं जनतानुरोधाद्
वरीवृषन् धार्मिकदेशनाम्भः ॥१६०॥

मुम्बापुरी श्रेष्ठिपुरःसराणा-
मत्याग्रहादेष चरित्रनेता ।
सत्रा सुशिष्यैर्बहुभिः सुविज्ञै-
राजग्मिवांस्तत्र सुखेन सूरिः ॥१६१॥

× १९८३.

चरित्रनेता तत एष सूप-
देशैरमोघैः पुरवासिसङ्घैः ।
छत्रीं सुरम्यां निरमीमपत्तैः
चितोपरिष्टात्कमनीयशैलैः ॥१५८॥

तस्यां सुचैत्येऽपिच सद्गुरूणां
बिम्बं सुभव्यं वरपादुके हि ।
अतिष्ठपच्चारुमहामहेन
समागताऽसंख्यजनेषु सत्सु ॥१५९॥

×त्र्यष्टाऽङ्कपृथ्वीमितहायनेऽसा
वध्यूषिवान् सूर्यपुरं सशिष्यः ।
वर्षर्तुकालं जनतानुरोधाद्
वरीवृषन् धार्मिकदेशनाम्बः ॥१६०॥

मुम्बापुरी श्रेष्ठिपुरःसराणा-
मत्याग्रहादेष चरित्रनेता ।
सत्रा सुशिष्यैर्बहुभिः सुविज्ञै-
राजग्मिवांस्तत्र सुखेन सूरिः ॥१६१॥

---

× १९८३.

पुरप्रवेशो कमनीयमुत्सवं
सूरीश्वरस्याऽस्य महीयसो हि ।
अचर्करीद्धार्मिक सर्वसङ्घः
उपादिशत्सूरिवरोऽथ धर्मम् ॥१६२॥

स्थितश्चतुर्मासमिहैव सर्वाऽ-
त्यन्ताऽऽग्रहादेष महाविपश्चित् ।
सुश्रावकाऽऽवश्यकधर्मभेदा-
नदीदृशन्मिष्टगिरा मुनीन्द्रः ॥१६३॥

प्रभावकैतत्सुगुरोरमोघ
महोपदेशान् परयाऽतिभक्त्या ।
आकर्णयन्तः प्रतिघस्त्रमत्र
प्रभावनाः श्रीफलमोदकादेः ॥१६४॥

तपांसि घोराणि बहूनि चक्रुः
व्रतानि चाऽऽदुर्नियमाननेकान् ।
उपाश्रयेष्वार्हतमन्दिरेषु
जीवाऽनुकम्पाऽऽदिषु भूरि दानम् ॥१६५॥

शालिनी०

प्रत्याख्यानं चाऽपि लोका लबुश्च
कृत्यं धर्म्यं सर्वलोकप्रशस्यम् ।
चातुर्मास्ये लब्धिसूरीश्वरस्य
धर्मोन्नत्यं चेत्थमैधिष्ट नित्यम् ॥१६६॥

उपजाति०

संसारवैरस्यविकाशकारी-
माकर्ण्य चैतद्गुरुदेशनां हि ।
तारुण्यभाजः सुजना हि सप्त
दीक्षार्थमुत्का अभवंस्तदानीम् ॥१६७॥
नगीनभाईत्यभिधानभाज-
जीवाऽभिधश्रेष्ठवराऽऽग्रहेण ।
अन्धेरिनाम्नीं नगरीमियाय
श्रीलब्धिसूरिः सह शिष्यवर्गैः ॥१६८॥
नानद्यमानैः पटहाऽऽदिवाद्यैः
सुसज्जितस्त्रीगणरम्यगीतैः ।
श्राद्धैः सहस्रैर्जयनादमुच्चैः
कुर्वद्भिरत्युग्रमहोत्सवेन ॥१६९॥

प्रवेशयामास समस्तसङ्घो
महान्तमेनं यमिनां वरिष्ठम् ।
अथाऽददात्सूरिवरः सुरम्य
सद्देशनां सर्वजनप्रशस्याम् ॥१७०॥
दीक्षाऽऽदिनानाविध धर्मकार्य-
मभूदमुष्मिन् गुरुपाणिपद्मात् ।
अमन्दमानन्दमधुश्च लोका
धर्मोपदेशाऽमृतमस्य पीत्वा ॥१७१॥

वसन्ततिलका०

आकारि राधनपुरात्परियास्यमान
श्रीसङ्घकेन सह गन्तुमयं महीयान् ।
[1]जीवाऽभिधेन विमलाचलतीर्थयात्रां
कारिष्यता गुरुवरो बहुनाऽऽग्रहेण ॥१७२॥

उपजाति०

ततःप्रधीः सूरिवरः सशिष्य
श्चक्रे विहारं द्रुतमेव तस्मात् ।

---

१ जीवाभाइ प्रतापसींह.

समागतोऽन्नूह्निमडीनगर्यां
मीमेल चाऽत्रैव समस्तसङ्घम् ॥१७३॥

राजानमत्रत्यमनेकयुक्त्या
जीवाऽनुकम्पाविषयोपरिष्टात् ।
उपादिशन्नार्हतधर्मतत्त्व
मेनं यथावत्समबूबुधच्च ॥१७४॥

ततः प्रयातः प्रतिपत्तनाद्यौ
धर्मोपदेशैर्बहुधोपकुर्वन् ।
श्री सङ्घपद्मे तपनायमानः
शत्रुञ्जयं तीर्थमसावयासीत् ॥१७५॥

प्रावीविशच्चैतममुं विशिष्टा
चार्येषु चूडामणितामुपेतम् ।
नानद्यमानैः सकलैः सुवाद्यै-
र्जनैरमेयैः पुरि सङ्घवर्गः ॥१७५॥

भवप्रवाहाऽपहृदेशनाभिः
सुधोपमाभिर्मुनिराजवर्यः ।

जैनांस्तदन्यानपि भव्यजीवान्
बहूपचक्रे जगदद्वितीयः ॥१७७॥
विज्ञप्तितत्या कृतया महेभ्यै
र्विहृत्य तस्मात् पुरि कुण्डलायाम् ।
चरित्रनेता समुपागतो हि
व्याख्यानधारां घनवद्ववर्ष ॥१७८॥
विभिन्नगच्छीयजना अजस्रं
सद्देशनाऽऽकर्णनलौल्यभाजः ।
एकत्र सङ्गत्य निशम्य सर्वे
लाभं महान्तं सममेव जग्मुः ॥१७९॥
प्रभावकस्याऽस्य सुदेशनाया
महाप्रभावो जनतासु तत्र ।
सर्वासु जैनादपरासु चाऽपि
पपात सम्यग्विविधोपकर्तुः ॥१८०॥

शार्दूल०

तत्रैतः पुरुषोत्तमोत्तमसुतो, [1]भावाऽभिधो वन्दितुं
श्रुत्वा गौरवदेशनां वृषचिकीरेतद्गुरोराज्ञया ।

---

१ भावनीभाइ

सोऽजारापुरपाऽश्वसेनतनयं द्रष्टुं हि षण्णोधरम्[२]
श्रीसङ्घं निरजीगमद् गुरुवरस्तत्राऽऽययावाग्रहात्
॥१०१॥

श्रीसङ्घं प्रतिवासरं ह्युपदिशंस्तत्त्वं गिरा मिष्टया
चारित्रं परिपालयन्नतितरां भव्याञ्जनांस्तारयन् ।
तत्राऽऽगत्य सुशिष्यवृन्दसहितः संघेन सत्रा मुदा
तीर्थेशं भवसन्ततिक्षयकरं भक्त्या ददर्शाऽमलम्
॥१०२॥

उपजाति०

श्रीकर्मचन्द्राऽऽख्यमहेभ्यसुनु-
नगीनदासस्य महाऽऽग्रहेण ।
तीर्थात्ततः सूरिवरो विहृत्य
समाययौ पट्टणपत्तने सः ॥१०३॥

अनन्यपूर्वं नगरप्रवेशो
गुरोरमुष्याऽतुलमुत्सवं हि ।
तितांसवोऽशेषविशेषपौरा
गुर्वागमाऽसीममुदं दधानाः ॥१०४॥

---

२ छरी.

चतुष्पथाऽऽदीन् रचनाविशेषैः
प्रत्यापणं तोरणबन्धनाद्यैः ।
संशोध्य बेण्डाऽऽदिकभूरिवाद्यैः
प्रावेशयन् सूरिवरं नगर्याम् ॥१०५॥ युग्मम्

घनो यथा प्रावृषि वारिधारां
तथाऽसकौ सूरिवरो महीयान् ।
सुधाऽधरीभूतसुदेशनाया
धारामुदारां समवीवृषच्च ॥१०६॥

वसन्ततिलका०

अर्हत्प्रणीतचिरकालिकसंयमैत-
न्मार्गप्रलोपककुधीजनताकृतेषु ।
सत्स्वप्यलंघ्यनियमेषु महत्सु तत्र
सर्वानसावगणयन्नकुतोभयः सः ॥१०७॥

आचार्यवर्यगुरुकीर्तिरनल्पतेजाः
श्री लब्धिसूरिरनघीकृतभूरिलोकः ।
दीक्षामदादतुलरम्यमहामहेन
श्रीवीरशासनमलं समवीवृधच्च ॥१०८॥

आष्टाह्निकोत्सवमपूर्वमभूच्च शान्ति-
स्नात्राऽर्चनं जिनवरस्य बभूव रम्यम् ।
इत्याद्यनेकसुकृताऽतुलकार्यमेतत्-
सूरीश्वरस्य सुगुरोरुपदेशतोऽभूत् ॥१८९॥

उपजाति०

श्राद्धादिवर्गैरनुगैः कियद्भिः
कृत्वा विहारं सह शिष्यजातैः ।
शङ्खेश्वरं तीर्थमियाय यात्रा-
चिकीरशेषाऽऽगमपूर्णविद्वान् ॥१९०॥
श्रद्धालवः श्राद्धजनाः कियन्त-
स्तत्राऽऽययुः पट्टणवासिमुख्याः ।
भक्त्या महत्या गुरुवन्दनार्थं
तत्तीर्थनाथेक्षणहेतवे च ॥१९१॥

वसन्त०

अत्राऽऽगतं गुरुवरं भविका निशम्य-
ह्यागुश्च राधनपुरादपि सद्गृहस्थाः ।
विज्ञप्तिकर्तुमनसः सुगुरोरमुष्य
मोमुह्यमानहृदयाः सदयाः कियन्तः॥१९२॥

प्रभावनापूजनसङ्घभक्ति-
व्याख्यानमत्राऽप्यधिकं बभूव ।
गुरोरनीहस्य परीषहाणां
सोढं समर्थस्य महोपदेशात् ॥१९३॥

वसन्त०

तस्माच्च राधनपुराऽखिलसङ्घमुख्य
विज्ञप्तितो गुरुवरः समुपाजगाम ।
सर्वश्चिराधनपुरं सुजनैरशेषै-
श्चक्रीयमाणपरमोत्सवमीक्षमाणः ॥१९४॥

शार्दूल०

जैनाऽजैनजनैरलङ्कृत--महाऽऽस्थानेऽभवद्देशना
संसारार्णवतारिणी ह्यसुमतां संत्राणमुख्यार्थिका ।
नित्याऽर्चा बहुधा प्रभावनमथ श्रीसंघभातसद्व्यता
तत्रेत्थं ववृधे सुधर्मलतिका श्रीमद्गुरावागते ॥१९५॥

आर्यागीती०

तदनुभैद्राजनगरं प्राचीनजैनसाहित्यप्रदर्शने ।
तदधिरतिकृताऽऽह्वानः स्वत्रसरे सहशिष्यैश्चरित्र-
नायकः ॥१९६॥

वसन्त०

प्राविक्षदेष महता जनताकृतेन
पुर्यामचिन्त्यमहिमा विविधोत्सवेन ।
नानर्घमानपटहादिकवादनेषु
सूरीश्वरः प्रवरवादितमित्रजानुः ॥१८७॥

वंशस्थ०

प्रदर्शनाऽदभ्रविशालमण्डपे
सहस्रमेयाऽऽगतसज्यशोज्ज्विते ।
पयोदनादोपमया गिरा मुदा
प्रदत्त सूरीश्वर एष देशनाम् ॥१८८॥
अपूर्वसैद्धान्तिकतत्त्वदर्शिनीं
सुधीयमानां भवभीतिहारिणीम् ।
सुतोषिणीं पण्डितमण्डलीहृदां
भवाम्बुधेर्नाविकवृन्दतारिणीम् ॥१८९॥युग्मं

पृथ्वी०

इतः कपडवञ्जकं सकलसङ्घविज्ञप्तितः
समेत्य कतिवासरान् न्यवसदत्र सूरीश्वरः ।

जनानुपदिशन् सदाऽकृत भृशं सुधर्मोन्नतिं
व्यबोधयदुदारधीरतिनिगूढतत्त्वं महान् ॥२००॥

वसन्त०

ठायापुरीमुपगतस्तत एष सूरिः
सङ्घाऽऽग्रहेण सकलानुपदिश्य धर्मान् ।
आयिष्ट बोरसदनामपुरं विशालं
संस्थापनाय भगवद्रमणीयमूर्तेः ॥२०१॥

अत्याग्रहादुपगतस्य समस्तसंघः
श्रीमद्गुरोस्तरणतारणदक्षिणस्य ।
पौरप्रवेशमहमुत्तममाततान
सद्वाद्यनादरमणीगणहारिगीतैः ॥२०२॥

संस्थापना गुरुकराऽमलवारिजेन
जाता पुराऽन्तरसमागतभानुरश्मि-
श्रद्धालुभव्यजनतासमुपस्थितौ हि
तद्देवद्रव्यचयनं विपुलं बभूव ॥२०३॥

आष्टाह्निकं महमपूर्वमभूच्च तस्मिन्
साधर्मिकीयरुचिराऽशनमप्यनेकम् ।

निर्विघ्नमेव सकलं समपद्यतैतच्-
श्रीमद्गुरोःपरमया कृपयेति मन्ये ॥२०४॥

छाणीपुरीमित उपागमदेष सूरि-
र्बह्वाग्रहं सकलसंघ उपेत्य चक्रे ।
अत्रैव वस्तुमखिलं घनकालमेतं
तद्वैव चैत्कपडवंजपुरीसुसंघः ॥२०५॥

उपजाति०

प्रावृट् चतुर्मासनिवासहेतो
रभ्यर्थयामास तदाऽतिमात्रम् ।
लाभाऽतिलाभं प्रविचार्य सूरि-
रस्यैव विज्ञप्तिमुरीचकार ॥२०६॥

द्रुतविलम्बित०

तत उपागतवान् प्रचुराग्रहात्
कपडवञ्जपुरं परमर्द्धिकम् ।
जनकृतैरतिसुन्दरसूत्सवैः
सुकृतिशिष्यसुमण्डलमण्डितः ॥२०७॥

भुजंगप्रयातम०

तपस्या प्रशस्या जनानाममुष्मिन्
सदादेशनाभिर्गुरोस्तत्त्वलाभः ।
पनीपद्यते स्माऽत्र भव्या जनाली
सुदार्ढ्यं स्वधर्मे शिवाऽऽप्त्येकहेतु ॥२०८॥

उपजाति०

धर्मादिकृत्येषु च भूरिदानं
प्रभावना श्रीफलमोदकाद्यैः ।
चैत्येषु नित्यं वरपूजनादि
श्रीमद्गुरोरस्य महोपदेशात् ॥२०९॥
ततो विजह्रे पुरि माणसायां
पेथापुरे चागतवाञ्छशिष्यः ।
ग्रामान्तरेष्वप्यनघो महीयान्
वीजापुराख्यस्य च मण्डलस्य ॥२१०॥
धर्मोपदेशैर्बहुधोपकुर्वन्
सर्वत्र धीरो गुरुराज एषः ।
जैना अजैना अपि भूरि लोकाः
सम्यक् प्रबोधं गमिता अनेन ॥२११॥

रथोद्धता०

माणसापुरि सुखस्थिते गुरौ
देशनां ददति जूरि जाजदाम्।
जव्यजीवजवजीतिहारिणीं
तारिणीं जगदुदन्वतो नृणाम् ॥२१२॥

स्वागता०

वर्धमानबहुडुष्करमाषा-
म्लव्रतं विदधतः समुपेताः।
मोहपत्तननिवासिमहेज्या
जोयणीपरमपावनतीर्थे ॥२१३॥

द्रुतविलंबित०

नवपदीयतदाचरणोत्सुका
अवसरेऽत्र निनीषव आग्रहात्।
सकलसूरिगुणैः समलङ्कृतं
जगडुरेनमरं चलितुम्प्रजुम् ॥२१४॥

त्रिजिर्विशेषकम्।

उपजाति.

स्वीकृत्य विज्ञप्तिमसौ तदीयां
प्रायादितः श्रीगुरुदेववर्यः ।
प्रौढप्रतापः सुकृतैकरागी
तत्राऽऽगमच्छिष्यगणैः समेतः ॥२१५॥

ग्रामाच्छताद्भक्तिभरेण भव्या-
स्तत्राऽऽगता नावपदश्च सम्यक् ।
आचाम्लमत्युत्कटपुण्यदायि
काष्ठासहस्रं व्रतमाविधातुम् ॥२१६॥

व्याख्यानवाचस्पतिलब्धिसूरिः
समागताऽशेषजने निषण्णे ।
प्रारब्धवांस्तत्र महोपदेशं
जीमूतगम्भीररगिरा सभायाम् ॥२१७॥

सिद्धान्तसारं परमार्थबोधं
सर्वोपकारक्षममद्वितीयम् ।
ग्राह्यं समेषाममृतायमान-
मोजस्विनं सर्वजनप्रशस्यम् ॥२१८॥ युग्मम्

इत्थं जनानेष बहूपचक्रे
सुशासनीयाऽतुलदीप्तिकारी ।
मान्यः सतां सज्जनवृन्दवन्द्य
आदर्शभूतो जगताममोहः ॥२१९॥

द्रुतविलंबित०

सुमुनयो बहवः समुपागता
गुणगणाऽमलरत्नविभूषिताः ।
अचलशीलविभूषणमण्डिताः
सुमिलिता बहुसाध्व्य इहाऽऽगताः ॥२२०॥

भुजङ्गप्रयात०

त्रिघस्त्रावशिष्टे गरिष्ठे महेऽस्मिन्-
न्नुपाध्याय आगात् सुधीः प्रेमनामा ।
सपन्न्यासरामो निजाऽशेषशिष्यैः
सहोपस्थितोऽभूत् प्रपन्नप्रतिष्ठः ॥२२१॥

वसन्ततिलका०

पन्न्यासभक्तिविजयः स गणी गुणाऽऽढ्यः
शिष्यैश्च षोडशमितैः परिषेव्यमानः ।

पन्न्यासन्नाक् सविजयः कुमुदाऽभिधानः
शिष्यत्रयीपरिवृतः समियाय धीरः ॥२२२॥

श्रीयुक्तबुद्धिविजयो दशसाधुयुक्तः
पं० कीर्त्तिसागरमुनिः श्रमणत्रयेण ।
पंन्यास पुष्पविजयः सरलस्तपस्वी
साधुद्वयीपरिनिषेवित आजगाम ॥२२३॥

उपजाति०

सौभाग्यनामा विजयोपनामा
वृद्धो गुणज्ञः सुतपोऽनुरागी ।
सुसंयताऽऽत्मा सदसि प्रवक्ता
बाणप्रमाणै र्मुनिभिः सहाऽऽगात् ॥२२४॥

मालिनी०

रविविमलसुनामा सम्पदाऽऽप्तिप्रतिष्ठः
सुमतिविमलनाम्ना साधुना सार्धमेयः ।
दिशि दिशि गुरुकीर्तिःकीर्तिनामा मुनिश्च
विजयसहितकीर्तिः सद्वितीयः समेतः ॥२२५॥

द्रुतविलंबित०

विजयसागर उग्रतपा गणी
स पमुपाधिधरः श्रमणःक्षमी ।
त्रिमुनिना च सहाऽऽगमदुत्सुको
निरतिचार सुसंयमपालकः ॥२२६॥

मालिनी०

सुजसविजयनामा प्रापदुल्लासिचेताः
विमलविजयनाम्ना साधुनैकेन सार्धम् ।
गुणिगणगणनीयौ सत्तपस्यौ नमस्यौ
विजयपर मुनिश्रीचन्द्रकीर्ती समेतौ ॥२२७॥

उपजाति०

वस्वष्टनिध्येकमिते सुवर्षे
चैत्रे सिते कौम्भिजिनेशतीर्थे ।
आष्टाह्निकाऽऽरब्धमहामहे हि
सप्ताऽष्टसाहस्त्रजनाः समीयुः ॥२२८॥

वसन्त०

इत्थं सपादशतसम्मितसन्मुनीनां
चोपस्थितौ प्रवरमौनसहाऽनुमत्या ।

एतच्चरित्रवरनायकनेतृतायां
निर्धारितानि सकलैः किल तान्यमूनि ।२२९॥

पृथ्वी०

वटोदरनरेश्वरः अबुध सत्त्ववर्गाऽऽग्रहात्
समग्रनिजराज्यके प्रथित बालदीक्षाविधिम् ।
निहन्तुमतिदारुणं विविधशासनं स्थापयन्
कुठारदृढपातनं ह्यकृत जैनवृक्षोपरि ॥२३०॥

निवर्तयितुमाग्रहान्नयविदं ? समुर्वीधवं
जिनागमसुहानिकृत्तदधुनाऽपि नानापुरात् ।
व्यजिज्ञपदुदारधीः प्रबलजैनसंघो बहु-
स्तदस्य विनिवर्तने प्रयतनीयमेवाऽखिलैः ॥२३१॥

उपजाति०

अष्टाऽब्दतः षोडशवत्सराणां
पित्रादिकाऽदेशवशा हि दीक्षा ।
ततः परं तद्विरहेऽपि शास्त्रे
ह्युत्सर्गतः सा कथितैव सद्भिः ॥२३२॥

वंशस्थ०

यदैव वैराग्यमशेषवस्तुनि
    शिशोश्च यूनः स्थविरस्य वापि हि ।
तदैव सर्वं परिहाय निर्ममः
    परिव्रजेच्चाऽऽत्महिताय सत्वरम् ॥२३३॥

शार्दूल०

द्रव्यादेरनुकूलताऽपि नितरां वर्वर्ति सम्प्रत्यपि
नो विच्छित्तिमयिष्यते बहुतरे काले गमिष्यत्यपि ।
तस्मादत्र समागता मुनिवरा एतद् ब्रुवन्ति स्फुटं
प्रव्रज्यां ददितुं सदा गुरुवराः सन्ति स्वतन्त्रा ध्रुवम्
॥२३४॥

वसन्त०

यत्पट्टणीयजनता प्रथयाञ्चकार
    श्रीसङ्घसम्मतिमृते महितोऽपि साधुः ।
दीक्षां प्रदातुमिह नैव भवेत्समर्थः
    शास्त्रप्रमाणविधुरं तदलीकमेव ॥२३५॥
ईदृग् जिनाऽऽगमविरुद्धमजिज्ञसंघो
    नाऽऽविष्करोति कथमप्यतिमूढवद्धि ।

तत्कोऽपि दुर्मतियुवैव तथा प्रकाश्य
श्रीमज्जिनेशवचनस्य विराधकोऽभूत् ॥२३६॥

उपजाति०

बहिष्कृतो "बेचरदास" एष
श्री सङ्घकेनाऽखिल सङ्घमध्यात् ।
कदाग्रही शासनहानिकारी
लेखं विधत्ते विपरीतमेव ॥२३७॥

जानन्तु चेत्थं सुखलालसंज्ञं
महासुखाऽऽख्यं सुजना अशेषाः ।
बहिष्कृतौ न स्त इमौ हि संघै
स्तथापि मान्यौ भवतो न संघे ॥२३८॥

दुर्वृत्तितः शासनगर्हणीय
लेखप्रचारं कुधियस्त्रयोऽपि ।
कुर्वन्ति जैनाऽऽदिकपत्रिकासु
न तत्प्रमाणं करणीयमेषाम् ॥२३९॥

अत्रस्थितानार्हतसर्वलोकान्
श्रद्धावतः श्रीजिनशासनाऽऽदौ ।

इत्येव भूयः परिबोधयन्ति
श्रामण्यवन्तः सकला अमी हि ॥२४०॥

ईदृग्विरुद्धाऽऽचरणप्रवृत्त-
पापीयसां वीरविभुप्रभक्ताः ।
नो श्रद्दधीरन् कथने तदीय-
जग्ध्यादिसंसर्गमपि त्यजेयुः ॥२४१॥

आनन्दसूनुः कुँवराऽभिधानः
श्रद्धालुमुख्यः सुकृतप्रसक्तः ।
सत्रा कुटुम्बैरनघः पुराऽसौ
ख्यातो जगत्यामधुना तदीयः ॥२४२॥

भ्रात्रीयमोतीयुतचन्द्रनामा
तदङ्गजन्मा परमादिनन्दः ।
विद्वेषिणामार्हतशासनस्य
मुख्यत्वमापद्य भृशं द्विषाते ॥२४३॥

आर्या०

तज्जैनधर्मप्रकाशमासिकपत्रे प्रकाशयति लेखम् ।
तस्य कुँवरजीभाई चरिकरीति सहायतामेषः॥२४४॥

इतिहेतोः सूचयते श्रीजिनाज्ञारसिक संघसमस्तम् ।
पुरेव श्रमणसंघो नहि वचनं प्रमिमीध्वममीषाम् ॥

उपजाति०

प्राक्ख्यातितस्तद्वचनं न कोऽपि
गृह्णातु नो वा प्रमिमीत लेखम् ।
नैवैतदुक्तौ कथमप्यभिज्ञो
विश्रम्भतामार्हतसंघमध्ये ॥२४६॥

चचक्रिरे श्रीकलिकालसर्व-
ज्ञहेमचन्द्रा भगवन्त ईड्याः ।
आचार्यवर्या जगदद्वितीया
जैनान् मुनीन् निक्षण जीवनाऽर्हान् ॥२४७॥

सामायिकस्थान् बहुभव्यनृभ्यो
धर्मोपदेष्टॄन् निरवद्यशीलान् ।
त्रिगुप्तियुक्तान् ममताविमुक्तान्
महाव्रतानां दधतः शमाढ्यान् ॥२४८॥

शीखरणी०

उपाध्यायः श्रीमान् मदति जनतामान्यवचनः
सभायां यः साधुः सरसवसुकामादिविषयान् ।

अशङ्कं व्याचष्टे शिवपथमहास्तेन उदितो
भवाम्भोधौ नूनं पतति जनतां पातयति सः ॥२४९॥

श्रामण्यभाजां जिनकीर्तितस्य
भवार्णवोत्तारणदक्षिणस्य ।
धर्मस्य शश्वज्जनतोपदेश
दानेऽधिकारः प्रददे जिनेन्द्रैः ॥२५०॥

प्रधानतः सर्वविरामधर्मः
सत्यां च शक्तावुपदेशनीयः ।
तदक्षमत्वे गृहमेधिधर्मे
विशेषतोऽर्हद्गुरुवन्दनादिः ॥२५१॥

सम्यक्त्वसम्प्राप्तिनिदानभूतं
लब्धीकृतैतत्स्थिरताविधायि ।
जिनेश्वराणां परयाऽतिभक्त्या
बिम्बार्चनं सद्गुरुसेवनञ्च ॥२५२॥

इत्थं सुकृत्याऽऽचरणेन जीवः
सम्यक्त्वमाप्नोति सुखेन नूनम् ।

इतो विरुद्धं यदि कोऽपि दद्यात्
स एव सर्वैः कुगुरुर्विबोध्यः ॥२५३॥

ईदृङ्महावञ्चकसाधुकस्य
कुमार्गनेतुर्नहि देशनाऽऽदि ।
श्रोतव्यमिष्टाऽऽप्तिधिया कदापि
चेतन्तु सर्वे मनसीति धीराः ॥२५४॥

पृथ्वी०

समस्तजनमानितः सुमतिमानुपाध्यायजी–
यशोविजयजी प्रभुः सकलशासनाऽग्रेसरः ।
जिनागमबहुस्थले कथितबालदीक्षाविधिं
सनातनमबाधितं कथयते मुनीनां पतिः ॥२५५॥

इन्द्रावज्रा०

प्रामाणिकं शैशवदीक्षणं हि
श्रेयस्करं स्वस्य परस्य चैनम् ।
जल्पन्ति येऽनर्थकरं विरुद्धं
धर्मद्विषस्ते सकला भवन्ति ॥२५६॥

उपजाति०

अनादिकालात्समुपैति बाल
दीक्षा ह्यविच्छिन्नतराऽत्र लोके ।
जैने तदन्यत्र च सम्प्रदाये
तत्किं वृथा मूढतमा वदन्ति ॥२५७॥

इन्द्रवज्रा०

जन्मान्तराऽऽराधितसंयमश्री-
रेवाऽत्र बालः स्थविरो युवा वा ।
गृह्णाति दीक्षां लघुकर्मयोगात्
गुर्वादिकः कोऽपि न हेतुरस्मिन् ॥२५८॥

उपजाति०

सम्मेलनेऽस्मिन् गुरुलब्धिसूरिः
शान्तप्रकृत्या सकलाऽनुकूलम् ।
स्वबुद्धिचातुर्यवशादशेष-
कृत्यं ह्यविघ्नं समपादयत्सः ॥२५९॥

खम्भातवास्तव्यमहेभ्यवर्याः
कस्तूरभाई प्रमुखा उपेताः ।

ऽयजिज्ञपंस्ते गुरुराजमत्र
कर्तुं चतुर्मासनिवासमेनम् ॥२६०॥

विहृत्य तस्मात्सह शिष्यवृन्दै-
रागाच्च खम्भातपुरं सदर्च्यैः ।
महोत्सवेनैनमवेशयत्स
संघः पुरं संयमशीलशोभम् ॥२६१॥

इन्द्रवज्रा०

कुर्वंश्चतुर्मासनिवासमत्र
श्रीसूरिमेघो नवरागहारि ।
सम्यक्त्व बोधोद्गमकारि हारि
सद्देशनापुष्करमुच्चकाट ॥२६२॥

उपजाति०

निशम्य वैराग्यमयीमपूर्वां
सुदेशनां नव्यजनाः प्रबुद्धाः ।
पुंस्त्रीजनाः पञ्चदशप्रमाणाः
संसारमेनं विरसं विदित्वा ॥२६३॥

इन्द्रवज्रा.

श्रीवीतरागैरुपदिष्टमार्गं
निःसीमशर्मप्रदसंयमं हि ।
संजातवैराग्यसुतीक्ष्णखड्गै-
राच्छिद्य मोहं जगृहुस्तदानीम् ॥२६४॥

उपजाति०

महोत्सवैस्तत्र जनिष्यमाणां
दीक्षां निरोद्धुं क्षितिभुक्पुमांसः ।
प्रयेतिरे किन्तु गुरुप्रभावात्
कर्तुं न शेकुः किमपि प्रभीताः ॥२६५॥

शार्दूल०

श्रीसंघस्य महाग्रहाद्भगवतीसूत्रं मुदाऽशुश्रवत्
श्रोतुं भूरि समुत्सुकान् प्रतिदिनं सभ्यानुपेतान् बहून् ।
मेघाऽऽरावतिरस्कृता वरगिरा माधुर्यसंमिश्रया
ह्यज्ञानाऽन्धविनाशने दिनमणिः श्रीलब्धिसूरिः प्रभुः

उपजाति०

प्रभावकस्याऽस्य गुरोरमोघ
महोपदेशैः सुकृतानि तत्र ।

अभूतपूर्वाणि बहुनि सर्व
लोकप्रशस्यान्यभवन् पुरे हि ॥२६७॥

भुजङ्गप्रयात०

चतुर्मासकस्याऽवसाने महीयान्
सहाऽशेषशिष्यैर्विहारं विधाय ।
समागाद्भरोदापुरीमेष सूरिः
समारब्धपौरप्रवेशोत्सवेन ॥२६८॥

उपजाति०

ओजस्विनं तत्र हि बालदीक्षा
व्याघातिसञ्चालितशासनानाम् ।
निवर्तनायाऽधिक शास्त्रयुक्त्या
सूरीश्वरोऽदाद्बहुदेशना हि ॥२६९॥

शीघ्रं विहारं तत एष कृत्वा
सत्पत्तनाऽऽदीन् क्रमतः पुनानः ।
बहूपकुर्वन्निज देशनाभिः
समागमच्चाणसमत्पुरीं सः ॥२७०॥

घारुप्रवेशोत्सवमाततान
तत्रत्यसंघो महनीयकोर्तेः ।
मनोहरैर्भूरिविधैश्च वाद्यै
र्गीतैर्वधूनां बहुभिर्जनैश्च ॥२७१॥

कियद्दिनान्यत्र महानवात्सीत्
पिप्राय भव्यान्निजदेशनाभिः ।
पुनस्ततः पट्टणसङ्घभूरि-
विज्ञप्तितस्तत्र समाययौ सः ॥२७२॥

महोत्सवेनैष पुरप्रवेशं
श्रीसङ्घमुख्यैर्विहितेन सूरिः ।
विधाय पीयूषसमानधर्म
सद्देशनां रम्यगिराऽददात्सः ॥२७३॥

तत्रत्यभव्यानखिलाननैषीत्
सम्यक्त्वदार्ढ्यं वरदेशनाभिः ।
तदन्यलोकानपि सूरिवर्यो
धर्मस्य तत्त्वं समबोधयच्च ॥२७४॥

तत्रस्थिता नूपनियुक्तकार्य-
कर्तार आकर्ण्य गुरोरमुष्य ।
व्याख्यानधारां बुबुधुश्च धर्म-
सत्यस्वरूपं पुरुषा अनेके ॥२७५॥

तत्रोपधानाऽभिधसत्तपस्या
बभूव शास्त्रोक्तविधानरीत्या ।
तदर्थमारब्धमहोत्सवेषु
विनिर्ययौ श्रीवरघोटको हि ॥२७६॥

दीक्षाविधिश्चारुमहामहेन
चरित्रनेतुर्वरपाणिपद्मैः ।
इत्याद्यनेकं सुकृतस्य कृत्यं
जज्ञे गुरूणामुपदेशनेन ॥२७७॥

ततश्च शंखेश्वरतीर्थयात्रा
चिकीर्बृहच्छ्रीमुनिमण्डलीयुक् ।
कृत्वा विहारं समुपाजगाम
प्राचीनतीर्थं बहुपावनं सः ॥२७८॥

आजग्मुरेतद्गुरुवन्दनार्थै
    भक्तिप्रणुन्ना बहवो हि लोकाः ।
*सद्राधनाऽऽद्येः पुरतश्च तत्र
    प्रख्यातिमत्स्तम्भणपत्तनाच्च ॥२७९॥
व्याख्यानपूजाविविधप्रभाव
    नादिप्रशस्यं सुकृतं बभूव ।
ततश्च सूरिः सह शिष्यवृन्दैः
    कुर्वन् विहारं नगरान्तरेषु ॥२८०॥
पथि प्रभव्यानुपदेशयन् हि
    शत्रुञ्जयं तीर्थमियाय सूरिः ।
नाभेयतीर्थाधिपतिं प्रभक्त्या
    ननाम तुष्टाव च सम्प्रहृष्टः ॥२८१॥

प्रियंवदा.

इह हि राजनगरे महापुरे
    श्रमणमेलनसमुज्ज्वलोत्सवः ।
विभवितेति चपलं निनीषया
    सह विनेयपटलैरमुं गुरुम् ॥२८२॥

---

* राधनपुर.

त्रोटक०

वढवानपुरे गुरुवर्यपुरः
नगरेऽन्यगरिष्ठजनः सुकृती ।
सहि कस्तुरभाइ शुभाऽभिधकः
समुपागतवान् बहुभि स्सुजनैः ॥२०३॥

उपजाति०

व्यजिज्ञपत्सोऽथ गुरुं हि तत्र
सम्मेलने गन्तुमवश्यमेव ।
विज्ञप्तितस्तस्य गभीरबुद्धिः
सूरीश्वरः शिष्यगणैर्व्यहार्षीत् ॥२०४॥

प्रागेव सम्मेलनतश्च तत्र
सशिष्यवृन्दः समुपागतोऽयम् ।
प्रावीविशच्चारुमहामहेन
पुरं तदैनं मुदितो हि सङ्घः ॥२०५॥

तस्मिन् प्रवेशे द्विशतं मुनीनां
श्राद्धाः सहस्रं ह्युपतस्थिवांसः ।

सुश्राविकामङ्गलगीतमुच्चै
गायन्त्य आसन् वरवाद्यनादैः ॥२०६॥

सम्मेलने चाऽयमगाधबुद्धि-
बलं स्वकीयाऽतुलतर्कशक्तिम् ।
सैद्धान्तिकज्ञानमपूर्वसंसत्
प्रवक्तृताशक्तिमदीदृशच्च ॥२०७॥

सम्मेलनाऽनन्तरमेष तस्मात्
विहृत्य चाऽगात् सह शिष्यवर्गैः ।
साणन्दगोधाविपुरं विशालं
स्वदेशनाभिर्जनतामतर्पीत् ॥२०८॥

सम्यक्त्वदार्ढ्यं भविकांश्च जीवान्
गोधाविपुर्यां नयमान आसीत् ।
श्रीसूरिरत्राऽवसरे च पाली-
ताणापुरीसङ्घ उपागतोऽभूत् ॥२०९॥

संस्थापनां कारयितुं स गोडी-
श्रीपार्श्वनाथस्य विभोः सुभक्त्या ।

प्रावृट्चतुर्मासनिवासमत्र
ह्यभ्यर्थयामास विधातुमेनम् ॥२९०॥

साणन्दगोधाविनिवासिसंघो
वर्षर्तुकालस्थितये च भूरि ।
विज्ञप्तिमेनं सुगुरुं प्रकुर्व
न्नासीत् सुभक्त्या बहुभावयुक्तः ॥२९१॥

विचिन्त्य सूरिर्भगवत्प्रतिष्ठां
तीर्थे पयोदाऽऽगमकालवासम् ।
कृत्वा विहारं द्रुतमेव तस्मात्
तदन्तिके मोखडकाभिधानम् ॥२९२॥

आगत्य तस्थौ सह शिष्यवृन्दै
राचार्यवर्यः सहि लब्धिसूरिः ।
निशम्य गुर्वागमनं च पाली-
ताणापुरीतः शतशो हि लोकाः ॥२९३॥
युग्मम्

दिदृक्षवस्तत्र समागता हि
स्वधर्मिवात्सल्यमपि प्रचक्रुः ।

जिनेन्द्रबिम्बार्चनमभ्यकुर्वन्

गुर्वागमाऽऽह्लादगुरुप्रहर्षाः ॥१९४॥

व्योमाऽङ्कनन्देन्दुमिते हि वर्षे[1]

ज्येष्ठे सिते भूधरजासुतिथ्याम् ।

प्रभातकाले भृगुजे च वारे

ह्यागाद्गुरोः सम्मुखमित्थमिभ्याः ॥१९५॥

महानकाऽनेकसुबेण्डभेरी

मृदङ्गनानाविधवाद्यकानि ।

निनादयन्तो नृपपत्तयो हि

चेलुः प्रहृष्टा मघवध्वजाग्र्याः ॥१९६॥

ततः कियन्तो ध्वजधारिलोका

रथाऽश्ववारा बहवः सशस्त्राः ।

सेवाजरा रम्यतरा अनेके

श्राद्धाऽऽदिलोका अनुगा अमेयाः ॥१९७॥

प्रियंवदा०

गुरुकुलीयकसुबेण्डवादनं

व्यनदहुच्चतरमुद्गतस्वरम् ।

---

१ १९९०.

सुजनकर्णसुखदायकस्फुटं
जयजयाऽऽरववितानसुन्दरम् ॥२९८॥

उपजाति०

इत्थं महाडम्बरतो महेभ्या
आचार्यवर्यं गुरुलब्धिसूरिम् ।
विधाय साम्मुख्यमुदारबुद्धिं
प्रावीविशंस्तं पुरमादरेण ॥२९९॥

धर्मोपदेशाऽमृतपायनेन
चकोरवृन्दोपमसर्वसङ्घम् ।
अतीतृपच्चैष विशिष्टसूरि-
व्रजीयचञ्चन्मुकुटायमानः ॥३००॥

अथाऽऽगते तद्दिवसे सुलग्ने
श्रीलब्धिसूरीश्वरसद्गुरूणाम् ।
पवित्रपाण्यब्जयुगेन नव्ये
खचुम्बिचैत्ये रचिते पुराऽन्तः ॥३०१॥

स्रग्धरा०

श्री मोक्षीपार्श्वनाथप्रभुवरललिताऽ-
शेषकल्याणकर्तृ बिम्बस्याऽभूत्प्रतिष्ठा

सकलविधिविधानेन सर्वेष्टदात्री ।
बाह्यग्रामादुपेता ह्यतुलपरिमिताः
सज्जना द्रष्टुमुत्का देवद्रव्याऽधिकायः
समभवदतुले सूत्सवेऽस्मिन् प्रशस्ते ॥३०२॥

उपजाति०

अष्टाह्नमारब्धमहे च तत्र
स्वधर्मिवात्सल्यमभूच्च नित्यम् ।
प्रभावना श्रीफलशर्करोप-
लौघैरनेकैरभवत्प्रकामम् ॥३०३॥

श्रीपार्श्वनाथाऽतिशयप्रभावा
दाचार्यवर्यैस्तदनुग्रहाच्च ।
समागतानां परमोत्सवेऽस्मिन्
कस्याऽपि नाऽभूदणुमात्रबाधा ॥३०४॥

निर्विघ्नमेतत्सकलं समाप्य
श्रीशान्तिलालाभिधखेतसीभ्य- ।
विज्ञप्तितः सूरिवरः सुविद्वद्
गम्भीरसल्लक्षणमुख्यशिष्यैः ॥३०५॥

वसन्ततिलका०

[१]गम्भीरधीरधिषणो विनयी सुविद्वान्

सत्तर्कशास्त्रकुशलो मुनि[२]लक्षणाख्यः ।

सङ्गीतराग[३]त्रिभुवनाभिध उग्रबुद्धिः

सद्धी[४]जयन्तविजयो मतिमान् [५]नवीनः ॥३०६॥

श्री[६]भाव[७]शान्तिविजयौ पटुवाक् [८]प्रवीणः

श्रीमान् [९]सुरेन्द्रविजयः सदयस्तपस्वी ।

[१०]योगीन्द्रनामकमुनिः कुशलः कलायां

[११]हेमेन्द्र[१२]पद्मविजयाव[१३]मरेन्द्रनामा ॥३०७॥

श्री[१४]सत्य[१५]नन्दन[१६]महोदयनामधेयाः

दभाऽग्र[१७]बुद्धिमहिमा [१८]सुमतिप्रभावः ।

श्री[१९]विक्रमो विजययुक् श्रमणो [२०]महेन्द्रः

[२१]कल्याण[२२]भास्कर[२३]यशोविजयो[२४]ऽजितश्च ॥३०८॥

[२५]रत्नाकरो [२६]रसिक[२७]कीर्ति[२८]जितेन्द्र[२९]नेमाः

[३०]कैलास[३१]हर्षविजयौ [३२]ललिताङ्गनामा ।

३३ ३४

भद्रङ्करः सुजनरञ्जनरञ्जनाऽऽख्यः

एतैः समस्तमुनितागुणशोभमानैः ॥३०९॥

वेदाऽग्निसंख्यैः कुशलैश्च तर्के

काव्येषु शाब्दे बहुनाटकादौ ।

युक्तश्चतुर्मासनिवासहेतोः

शान्तिप्रयुक्ते भवने समागात् ॥३१०॥

अत्रस्थैः समभिज्ञकैर्भगवतीसूत्रं पवित्रं महत्

श्राद्धैर्वाचयितुंव्यधायिबहुधाविज्ञप्तिरेतद्गुरोः ।

श्रीमान्सूरिवरस्ततोमधुरयागम्भीरया सद्गिरा

प्रारेभे तदशेषलोकहृदयाऽऽह्लादं भृशं वर्धयन् ॥३११॥

तदीयसूत्रार्थमतिस्फुटं हि

प्रबोधयंच्छ्रोतृजनानशेषान् ।

सुश्रोतृशङ्कामखिलां निरस्य

श्चतुर्विधं सङ्घमतूतुषत्सः ॥३१२॥

निशम्य सर्वे विधिवत्समग्रं

जैनीयसत्तत्त्वरसाऽपगायाम् ।

निमग्नतामापुरशेषलोकाः
संमेनिरे स्वं कृतकृत्यमेव ॥३१३॥

मध्याह्नकाले महता श्रमेण
चतुर्विधस्याऽस्य सुसंघकस्य ।
समक्षमावश्यकसूत्रमेष
ह्यवाचयत्प्रत्यहमप्रमत्तः ॥३१४॥

अध्यापयत्सूरिवरोऽनुयोग-
द्वाराऽऽदिसूत्रं सकलं तथैव ।
सौम्यप्रकृत्या सकलाऽऽगमज्ञः
प्रधीमतामद्वयतामुपेतः ॥३१५॥

भुजङ्गप्रयात०

चतुर्मासकेऽस्मिन् मतिद्रव्यसाधा-
रणद्रव्यदेवद्रविणाऽधिकाऽऽयः ।
अभूच्चैत्यविद्यालयोपाश्रयाऽर्थे
तथा जीवरक्षाकृते भूरिदानम् ॥३१६॥

इन्द्रवज्रा.

कृत्यं पुरेदृङ् नहि संबभूव
वर्षैः कियद्भिस्तदभूदिदानीम् ।

तत्सर्वमेतद्गुरु[illegible]-
मोघोपदेशस्य फलं हि सत्ये ॥३१७॥
एतच्चतुर्धात्मकसङ्घमध्ये
मासोपवासाऽऽदितपःशतानि ।
अनेक आष्टाह्निक उत्सवोऽत्र
च्छान्त्यादिकस्नात्रमतीव भूरि ॥३१८॥

उपजाति०

अनेकशोऽनून्नवकारशीह
नानाविधं धार्मिककृत्यमेतत् ।
चिराय सर्वैः [illegible]
स्तुत्यं समस्तैरजनिष्ट लोकैः ॥३१९॥
श्रीमद्गुरोरस्य महोपदेशात्
पाल्यादिताणानगरे गरिष्ठे ।
सन्मङ्गलाऽशेषसमृद्धिकारि
ख्यातं तपोऽनूदुपधाननामा ॥३२०॥

इन्द्रवज्रा०

तस्मिंश्च सौराष्ट्रिक गुर्जरीयाः
कच्छीयका मारवदाक्षिणात्याः ।

पुंस्त्रीजनाः पञ्चशतप्रमाणा
आराधयामासुरिदं समेताः ॥३२१॥

उपजाति०

एकश्च सिद्धाचलपुण्यतीर्थे
द्वितीय एतद्गुरुदेवकस्य ।
सुशीतलच्छाययथेच्छवासः
सत्पुण्ययोगादुभयप्रसङ्गः ॥३२२॥

तेषां समेषां नरनारिकाणा
माराधकानामनघव्रतस्य ।
निःसीमकाऽऽनन्दरसप्रभाजां
क्रियासमाप्तिः समभूदविघ्ना ॥३२३॥

आचार्यवर्याऽन्निधया पुरेऽस्मिन्
सेवासमाजाऽऽदिकमण्फलस्य ।
अस्यापि संस्था सकलैश्च पौरैः
सज्जैनधर्मस्य समुन्नताप्त्यै ॥३२४॥

शार्दूल०

मालायाः परिधापनं सदुपधानान्तेऽभवत्सूत्सवै
रष्टाह्नान् विहितैः समस्तसुजनैरत्यादरात्सुन्दरैः।
शान्तिस्नात्रसुपूजनैष महती सज्जन्ययात्राऽचलत्
देवद्रव्यसुसञ्चयोऽपि बहुधा भूयानभूत्सज्जनैः॥३२५॥

धन्वस्थदेलन्धरवासि हुक्मा
भिधस्य पत्नी सुकृतैकचित्ता।
चम्पाभिधाना ह्युपधानमेतद्
गुरूपदेशात्समचीकरत्सा ॥३२६॥

गव्यूतिषट्कीयसुसङ्घमेषा
निष्काशयामास महामहेन।
तयोश्च लक्ष्मीयुतचन्दनामा
सम्पादयामास समस्तकृत्यं ॥३२७॥

उपजाति०

बह्वाग्रहात्तत्र गुरुर्महीया-
ञ्छिष्यैः कियद्भिर्विबुधैर्विनीतैः।
तपोरताभिः श्रमणीभिरेष
सार्धं चचालाऽनुपमप्रभावः ॥३२८॥

सत्काव्यनिर्माणकरी च शक्तिः
सल्लेखने चाद्भुत शक्तिरग्र्या ।
प्रवक्तृताशक्तिरमुष्य याऽस्ति
सा लेखनीबाह्यतरेति जाने ॥३२९॥
अद्यावधि प्रौढमतिः प्रविद्वान्
ग्रन्थान् स्वधर्म्यान् रचयाश्चकार ।
सूरीश्वरो यावत एष तेषां
नामानि सम्यक् क्रमशो लिखामि॥३३०॥
सद्गुर्जरीयाऽधिकमिष्टभाषा
विनिर्मितैषा स्तवनावली हि ।
नूत्ना हि नूत्नाः दशसप्तपूजाः
पृथक् पृथग् भावविशेषरम्याः ॥३३१॥

गीति०

[१]हीरोविचारमेकं देवद्रव्यसिद्धिमूर्तिमपरमने ।
रचयाम्बभूवसूरिर्ह्यविद्यान्धकारमार्तण्डाऽऽदींश्च
॥३३२॥

---

१ ए नामनुं पुस्तक.

आर्या०

सुगमा संस्कृतभाषा वैराग्यरसमञ्जरी बहुरम्या ।
हृद्यपद्यमयचित्रामेरुत्रयोदशीकथैषा ॥३३३॥

इन्द्रवज्रा०

ग्रन्थाः किलैते सकलार्हताना
मत्यन्तशिक्षाप्रददा लसन्ति ।
एतत्समीक्षाकरणेन भूरि
सम्यक्त्वबोधः समुदेति शीघ्रम् ॥३३४॥

---

सूरीश्वरकृत चतुर्मासिसंख्यानं [ प्रकाशनं ]

उपजाति०

श्रीमांश्चतुर्मासमसौ चकार
सूरीश्वरैस्तैरिभरे सहाऽऽद्यम् ।
नवेषु[1]रन्ध्र-क्षिति-सम्मितेऽब्दे
विद्याविनोदी गुरुत्तीर्थवासी ॥३३५॥
[2]व्योमाऽङ्क नन्द-क्षिति हायने तु
वटोदरे भूमि[3]रस-ग्रहेन्दौ ।

---

१ १९५९ २ १९६० ३ १९६१

तस्थौ महेन्द्राऽऽदिपुरे प्रशस्ते
प्रावृट् चतुर्मास मनल्प बुद्धिः ॥३३६॥

पक्षाऽङ्क-निध्येकमिते[१] च वर्षे
बङ्गप्रसिद्धाऽजिमगञ्जपुर्याम् ।
अस्थात्पुनर्लस्कर राजधान्याम्
त्रि-तर्क-नन्द क्षितिमान[२] वर्षे ॥३३७॥

ततोऽध्यवात्सीद्गुजरानवाला
मम्भोधि-तर्क ग्रहभूमिताऽ[३]ब्दे ।
धर्मोपदेशाद्धि जनानतीव
सूरीश्वरः प्रीणयति स्म नित्यम् ॥३३८॥

विहृत्य तस्मादुपगत्य नारो-
वालं पुरं तत्र महामहेन ।
गम्भीरनाम्नो विजयस्य दीक्षां
दत्त्वा कसूरं पुरमाजगाम ॥३३९॥

संघाऽऽग्रहात्तत्र शराऽङ्कनन्द-
[४]क्षित्यब्दकेऽतिष्ठदसौ सुविद्वान्

---

१ १९६२ २ १९६३ ३ १९६४ ४ १९६५.

सुधोपमैः स्वीयमहोपदेशै
राह्लादयत्सर्वजनानजस्रम् ॥३४०॥

तर्काऽङ्ग–रन्ध्रक्षितिसंख्य[१] वर्षे
लुध्यादि हानापुरि संन्युवास ।
[२]सप्तर्तु–निध्येकमिते च वर्षे
हुश्यारसंयुक्तपुरे न्यवात्सीत् ॥३४१॥

लुध्यादिहानापुरमभ्युपेतः
श्रीपार्श्वनाथप्रभुबिम्बमेषः ।
संस्थापयामास महामहेन
लोकाः सहस्राण्युपतस्थिरेऽस्मिन् ॥३४२॥

वसन्ततिलका०

तत्राऽधिकारि पुरुषा बहवो महान्तो
व्याख्यानमस्य सुगुरोर्नुनुवुर्निशम्य ।
सद्धर्मतत्त्व परिदर्शनकारि सद्यः
प्रव्यक्तसौधरसतापरिपूर्णताऽऽढ्यम् ॥३४३॥

---

१ १९६६ २ १९६७.

मुल्तानवासिबहुसंघकृताऽऽग्रहेण
तद्दिश्यसौ व्यहरताऽखिललाभहेतोः ।
मार्गेऽप्यनेकनगरे सुजनैः सहस्रैः
संत्याजयंश्च पलभक्षणमेष सूरिः ॥३४४॥
इत्थं सुखेन समुपागतवान् स सूरि
र्मुल्तान नाम नगरीमचिरेण विद्वान् ।
तामध्युवास जलदाऽऽगमतुर्यमासान्
वस्वङ्ग-रन्ध्रशशिसम्मित[1] हायनेऽसौ॥३४५॥
अत्याजयच्च विविधागमसत्प्रमाणैः
रम्योपदेशपटलैर्जनता सहस्रैः
मांसादकैरपि पलाऽशनमेषको हि
भूयिष्ठपापजनकं कुगतिप्रदश्च ॥३४६॥

मालिनी०

निधिरसनवचन्द्रे[2] वत्सरेऽम्बाऽऽदिलायां
न्यवसदयमशेषप्रावृषिं प्रौढविद्वान् ।
तदनु सहि सिकन्द्राबादमागत्य सूरि
र्हयशशिमितवर्षे मालवोद्भुतमेकम्॥३४७॥

---

१ १९६८ २ १९६९.

शार्दूल०

नाम्ना दोलतरामकं शुभधियं प्रव्राज्य चाऽत्सवैः
कृत्वा तस्य स लक्ष्मणाऽऽदि विजयं सन्नाम दिल्ली
मगात् ।
व्योमाऽश्वाऽङ्क-कुवत्सरे[1] गुरुवर स्तत्रैव संघाऽऽग्रहाच्
चातुर्मास्यमलञ्चकार सहितःसच्छिष्यवृन्दैरसौ
॥३४८॥

व्याख्यानमेतस्य यदा प्रसिद्धं
जज्ञे स्वसिद्धान्तविचारपूर्णम् ।
संश्रोतुमुत्काऽऽगत सज्जनानां
तदा तदा पञ्चसहस्रसंख्या ॥३४९॥

स गुर्जरं देशमुपेत्य तस्मान्
मिमेल तं श्रीगुरुमीडरे हि ।
भूवाजिनन्देन्दुमितेच [2]वर्षे
सहैव वर्षा समयं व्यनैषीत् ॥३५०॥

---

१ १९७० २ १९७१.

खम्भातपुर्यां द्ववाजिनन्द
  महीमितेऽ[१]ब्दे न्यवसत्सुखेन ।
गुणाऽश्वरन्ध्रक्षितिमानवर्षे[२]
  न्युवास तस्मिन् कपडादिवंजे ॥३५१॥
युगाऽश्वनन्दक्षिति वर्षकेऽम[३]-
  दावादवासं मणिलाल संज्ञं ।
संदीक्ष्य संज्ञां निपुणेति तस्य
  कृत्वाऽवसद्द बोरसदाऽऽख्यपुर्याम् ॥३५२॥
अस्थाच्चतुर्मासमिहैव सर्वं
  विज्ञप्तितः सुश्रमणप्रधानः ।
भूताऽश्वनिध्येकमितेच वर्षे[४]
  कणोइ पुर्यामवसत्सुखेन ॥३५३॥
अनन्तरं दोलतरामपुत्रः
  स माणासावासि सरूपचन्दः ।
धनं स्त्रियं विंशतिघस्त्रमात्रं
  पुत्रंच हित्वा ह्यधिमालवं हि ॥३५४॥

---

१ १९७२ २ १९७३ ३ १९७४ ४ १९७५.

प्रतापयुक्तगढमेत्य तूर्णं
तत्रस्थगम्भीरमुनेः सुपार्श्वे ।
लात्वा सुदीक्षामधिभूय शिष्यो
मौनाऽधिपश्रीविजयाऽऽदिलब्धेः ॥३५५॥

शुभेतिनाम्ना विजयाऽनुगेन
ह्यपप्रथच्चैष समस्तलोके ।
तर्काऽश्वनन्द क्षितिहायने[१]ऽसौ
खम्भातपुर्यामवसन्मुनीन्द्रः ॥३५६॥

सप्ताऽश्वरन्ध्रक्षितिमान[२] वर्षे
वटोदरे न्युष्य ततोऽभ्युमेटम् ।
गायापुरोद्भूतमसौ छबील-
दासाऽभिधं षोडशवत्सरीयम् ॥३५७॥

सुदीक्ष्य चारूत्सवतस्तदीयं
शुभाऽभिधानं भुवनेति चक्रे ।
छाणीमुपेत्याऽऽगमयच्चतुर्मा-
सं शैलवाजिग्रहभूमि[३] वर्षे ॥३५८॥

---

१ १९७६ २ १९७७ ३ १९७८.

विहृत्य तस्मात्सह शिष्यवर्गैः
समागतो बोरसदाख्यपुर्याम् ।
अदीक्षयत्तत्र रुणोइवासि
फुल्लाऽऽदिचन्दस्य सुपुत्रमेकम् ॥३५९॥

सजीवणं लालमसौ महेन
जयन्तनामानममुं प्रचक्रे ।
विधाय शत्रुञ्जयतीर्थयात्रां
नवाऽश्वनन्दक्षिति[१]सम्मितेऽब्दे ॥३६०॥

चक्रे चतुर्मास निवास मत्र
स राधनादौ पुर आगतो हि ।
बिन्द्वष्ट–नन्द–क्षिति[२]वत्सरे च
छाणयामतिष्ठद्गुरुभिः सहाऽसौ ॥३६१॥

पूर्णे चतुर्मासिक सन्निवासे
पन्न्यासभाजे मुनिदाननाम्ने ।
व्याख्यानवाचस्पतितर्करत्ने–
त्युपाधिमच्छ्रीमुनिलब्धये च ॥३६२॥

---

१ १९७९ २ १९८०.

उच्चैस्तरं सूरिपदं गरीयान्
दद्‌ावसौ श्री कमलाख्यसूरिः ।
[१]नूम्यष्ट-रन्ध्रक्षितिमानवर्षे
वर्षर्तुवासं सुरते स चक्रे ॥३६३॥

छायापुरीवासि नगीनदासं
छोटाऽदिलालाङ्गजुवं मुमुक्षुम् ।
प्रव्राज्य चक्रे शुभनाम तस्य
नवीनयुक्तं विजयं गुरुः सः ॥३६४॥

पक्षाऽष्ट–रन्ध्र–क्षितितुल्य[२]वर्षे
समध्यवात्सीन्नगरी बुहारीम् ।
[३]गुणाऽष्ट–नन्द-क्षितिसम्मितेऽब्दे
नरोदकीयं छगनाऽऽदिलालम् ॥३६५॥

सांसारिकाऽशेष-विशेषवस्तु
वैराग्यसम्पन्नमुदारभावम् ।
प्रव्राज्य सूरिर्महता महेन
शुभाभिधानं विदधे प्रवीणम् ॥३६६॥

---

१ १९८१. २ १९८२ ३ १९८३

अहमदनगरनिवासं, गगलाभिधमपि दीक्षयित्वा
शान्तिविजय इति नाम, कृतं गुरुवरलब्धिसूरिणा ॥३६७॥

ततो विहारं विदधत्सशिष्यः
सन्तस्थिवान् सूर्यपूरे विशाले ।
वर्षर्तुकालं विनिनीषया हि
चरित्रनेता जनताऽऽग्रहीतः ॥३६८॥

मुम्बापुरी श्रेष्ठिगणाऽऽग्रहेण
युगाऽद्रि निध्येकमिते च [1]वर्षे ।
चक्रे चतुर्मासमसौ हि तत्र
सद्देशनाभिः सकलानतर्पीत् ॥३६९॥

विहृत्य तस्मादितवांश्च सूरि
रन्धेरिकायां ददिवांश्च दीक्षां ।
घोघौकसश्चेश्वरलालनाम्नः
तन्नाम योगीन्द्र इति व्यधत्त ॥३७०॥

ततः समागत्य सशिष्य एष
सीसोदरे तं मणिलालदीक्ष्यम् ।

---

१ १९८४.

संन्यास्य सूरि र्महतामहेन
चक्रे च हेमेन्द्र सुनाम तस्य ॥३७१॥

ततो भरूचेऽमृतलालखूब
चन्द्रस्य दीक्षामददात्स सूरिः ।
नामाऽमरेन्द्रेति विधाय तस्य
शत्रुंजयं तीर्थमुपाजगाम ॥३७२॥

शालिनी०

तत्र श्यामं प्रेमचन्द्रं गुलाब
चन्द्रं सम्यग्दीक्षयित्वा क्रमेण ।
आद्यस्याऽऽख्यां श्रीसुरेन्द्रेति पद्म
सत्यं श्रीमान्नाम दध्रेच तेषाम् ॥३७३॥

शराऽद्रिनन्दक्षितितुल्य [1]वर्षे
स कुण्डलायां पुरि तस्थिवान्हि ।
तर्काऽष्ट-रंध्रैकमिते च [2]वर्षे
शिष्यैरशेषैः सह पट्टणेऽस्थात् ॥३७४॥

---

१ १९८५ २ १९८६.

इह मनसुखलालं नन्दलालंच पूर्वं
परमशुभदवारे दीक्षयित्वा महेन ।
क्रमिकमकृतनाम श्री महोयुग्दयेति
प्रथमविहित दीक्षं श्रीयुतं नन्दनंच ॥३७५॥

छोटाऽऽदिलालस्य हि बालुभाई
नाम्ना प्रसिद्धस्य च चाणसाख्ये ।
प्रदाय दीक्षा मकरोच्च मुक्ति
श्री विक्रमेति क्रमशस्तदाख्याम् ॥३७६॥

प्रदत्तवान् सूर्यपुरेऽपि तस्य
झवेरि मोतीयुतचन्दकस्य ।
दीक्षां तदीयं ललिताऽभिधानं
चक्रे तदानों महिमेति [1]सूरिः ॥३७७॥

छायापुरीस्थं शुभ पेमचन्दं
संदीक्ष्य सूरिश्च सपत्तनाख्ये ।
प्रभाव नाम प्रददौ महेन
विधूय पापं युवकैः कृतं हि ॥३७८॥

१ सागरानन्देतिशेषः

इन्द्रवज्रा.

तस्थौ पयोदाऽऽगमकाल एष
संघाऽऽग्रहात्पट्टणपत्तने हि ।
तं कान्तिलालं परिवीक्ष्य तत्र
कल्याणनामानममुं चकार ॥३७९॥
राजेन युक्ते नगरे च मोह
नलालकं चाऽपि सुवीक्ष्य [1]सूरिः ।
महेन्द्रयुक्तं विजयं तदीयं
चक्रेऽभिधानं गुरुदेववर्यैः ॥३८०॥
समेत्य तस्मिन् कपडाऽऽदिवञ्ज
प्रव्राज्य कान्त्यायुतलालमेनम् ।
श्री कञ्चनाऽऽदि विजयं च तस्य
चकार सन्नाम ततो विहृत्य ॥३८१॥
छाणी मुपेतस्त्रिभुवाऽऽदिनस्य
श्री धैर्यलालस्य च सम्प्रदाय ।
दीक्षामकार्षीदनयोश्च सूरी
रत्नाकरं भास्करनाम धेयं ॥३८२॥

---

१ सागरानन्देतिशेषः

बह्वर्द्धिकाढ्ये कपडाऽऽदिवंजे
संघाऽऽग्रहात्तत्र चरित्रनेता ।
इयाऽद्रि–नन्देन्दु मिताऽब्दकीये[१]
वर्षर्तुकालं गमयाञ्चकार ॥३०३॥

तत्रैव दत्वा रमणीकलाल
स्याऽप्येष वैराग्यसुवासितस्य ।
दीक्षां तदीयं शुभनामधेय
मत्युत्तमं श्रीरसिकेति चक्रे ॥३०४॥

इतस्ततः सूरजकं जयादि–
चन्द्रं प्रदीक्ष्याऽस्य यशोभिधानम् ।
धृत्वा [२]ततस्ताम्रवतीनगर्यां
समाययौ सूरिवरः सशिष्यः ॥३०५॥

बोटाऽऽदिलालं परिदीक्ष्य तत्र
कैलासनाम्ना प्रथितं प्रचक्रे ।
वस्वष्ट-रन्ध्र-क्षितिमानवर्षे[३]
तस्मिंश्च तस्थौ चतुरश्च मासान् ॥३०६॥

---

१ १९८७ २ खंभात. ३ १९८८.

झवेरि लक्ष्मीयुतचन्दमत्र
सूरीश्वरः सूर्यपुरीयमेतम् ।
खम्भातकीयाऽमृतलालकं च
प्राव्राजयच्चारुतरोत्सवेन ॥३७७॥

त्रोटक०

ललिताऽङ्गमथाऽजित नाम तयो
र्धृतवानुजयोर्नवदीक्षितयोः
अतिसुन्दरलक्षणलक्षितयो
र्गुरुराज उदारमनाः क्रमशः ॥३७८॥

अथाऽऽगतश्चाणसमाख्यपुर्यां
प्रव्राज्य कान्ति शुभनाम तस्य ।
श्रीकीर्तियुक्तं विजयं विधाय
प्रादीक्षयत्तं रमणीकलालम् ॥३७९॥

श्री रञ्जनेति प्रविधाय नाम
डाह्येति नामानमपि प्रदीक्ष्य ।
श्री हर्षनाम्ना प्रथितं प्रकृत्य
साणन्दपुर्यां समुपागतोऽभूत् ॥३८०॥

तं नेमचन्द्रं सुरताऽधिवासं
सुदीक्षितं तत्र विधाय चाऽमुम् ।
नेमेति नाम्ना प्रथितं प्रचक्रे
सत्पत्तनं पट्टणमागमच्च ॥३८१॥

तत्रापि भीखाभिधमात्तदीक्षं
भद्रङ्कराऽऽख्यं विदधे च सूरिः ।
[1]नवाऽष्ट-नन्देन्दुमिते च वर्षे
स तस्थिवान् पट्टणपत्तने हि ॥३८२॥

व्यतीत्य वर्षर्तुमसौ हि तत्र
झवेरिकं सूर्यपुराधिवासम् ।
जयादिचन्द्रं परिदीक्ष्य चक्रेऽ--
जितेन्द्रनामानममुं विनीतम् ॥३८३॥

व्योमाऽङ्कनन्देन्दुमित [2]प्रवर्षे
चरित्रनेता जनताऽऽग्रहेण ।
वर्षर्तुकालं गमयाम्बभूव
सिद्धाचले भूरि विनेययुक्तः ॥३८४॥

---

१ १९८९ २ १९९०.

इन्द्र०

सूरीश्वरोऽनेकजनानुगम्य-
मानः पुरात्पावनपादलिप्तात् ।
शीहोरपूर्वासिजनाग्रहेण
प्रस्थाय शीघ्रं पुरमाजगाम ॥३९५॥

उप०

आसीच्चिराद्यन्मनुजेषु वैरम्
धर्मोन्नतौ बंधकमत्र सूरिः ।
सद्युक्तिजालैश्शमतामनैषीत्
प्रबोध्य हानिं च निदर्शयित्वा ॥३९६॥

एकाऽङ्कनन्देन्दुमिते प्रवर्षे
चरित्रनेताऽमरचंद्र संज्ञम्
संदीक्ष्य पौषे सितमाधवाह्वे
नाम्नारविन्देत्यगदत् पुरेऽस्मिन् ॥३९७॥

गुलाबचन्द्रस्य च धर्मपत्नी
नेमीकुवँारी हरिचन्द्रसूनोः ।
जूनागढं यन्तुमितो हि संघ-
मसज्जयत्सूरिमहोपदेशात् ॥३९८॥

इंद्रवंशा०

संघेन सार्धं मुनिभिस्सुसेवितः
प्रस्थाय पूर्षु प्रचुरासु वर्त्मनि ।
धर्माम्बुधारां विकिरन्मुनीशिता
गिर्नारतीर्थं समियाय सुन्दरम् ॥३९९॥

उप०

श्रीनेमिनाथं प्रभुमस्तरागम्
नानाविधैः संस्तवनैर्विलोक्य ।
प्रमोदपूरैः परिपूर्णचेताः
ननाम भक्त्या बहुधात्र सूरिः ॥४००॥

तस्मादनेकेषु पुरेषु सूरिः
विहृत्य धर्मोन्नतिमाचरंश्च ।
मूर्तेर्गुरोः श्रीकमलादिसूरेः
कर्तुं पुरं पट्टनमैत्प्रतिष्ठाम् ॥४०१॥

श्री लब्धिसूरेऽमहनीयकीर्तेः
मुनीन्द्रवन्द्यस्य विचक्षणस्य ।
पाठेन पुण्यप्रदमुत्तमं द्राक्
समाप्तिमागाच्चरितं हि पूर्वम् ॥४०२॥

आर्या०

गोवर्धनतनुजन्मा व्याकरणतीर्थ भूषण व्रजनाथः
मिथिलादेशनिवासी, मिश्रोपाह्वसुधीद्विजवर्यः ।४०३।
जैनाऽऽचार्यवराणां चूडामणीयमानलब्धिसूरेः ।
स्वपरसमयविदुषोऽस्य विश्वजनीनस्य महीयसः ४०४

इन्द्रवज्रा०

[१]चन्द्राङ्कनन्दक्षिति सम्मितेऽब्दे
मार्गे सिते भानुतिथौ सुरेज्ये ।
श्रीपादलिप्ताऽभिधपत्तनेऽसौ
सुश्लोकबद्धं तदिदं चकार ॥४०५॥

इति श्री व्या० वा० आचार्य महाराज श्रीमद्
विजयलब्धिसूरीश्वर चरित्रस्य पूर्वार्धं

* समाप्तम् *

१ १९९१.

श्री वीतरागाय नमः

श्रीमच्छान्तदान्ततपोव्रतविभूषित जैनरत्न व्याख्यान
वाचस्पत्यादिविविधपदवीसमलङ्कृतश्रीमद्
लब्धिसूरीश्वराणां प्रशस्तिपद्यानि ।

स्रग्धरा०

शश्वल्लब्धोदया ये कुवलयवलया
बोधकाबोधभाभिः लोकालोक प्रतापाः
कुमतिमततमोदारका दीप्तदीप्त्या ।
श्रीमद्गम्भीरमुख्यैर्मुनिभिरभिमता
विश्वविश्वप्रदीपाः जीयासुः सूरिसूर्या
बुधकविसुव्रता लब्धिसूरीश्वरास्ते ॥१॥

शार्दूल०

श्रीमन्मान्यतमाः सदादिततमाः सम्यक्त्व सम्य-
ग्वृताः ।
मुक्त्यै सूक्तिसुधाऽनुवर्षणपराःसद्दर्शनादर्शकाः ।

धर्मोद्धारविधौ विधिव्रतधरा दीक्षावने दीक्षिताः
जीयासु जैयिलक्ष्मणादियतिपाः श्रीलब्धिसूरीश्वराः
॥२॥

स्रग्धरा०

लब्ध्वा लब्ध्वा सुदीक्षां जिनमत सुमतां
सत्य वैराग्ययुक्तां दग्ध्वा दग्ध्वाऽऽत्मदोषा
न्कलिमलकलितान्तीव्रतप्तैस्तपोभिः ।
हित्वा हित्वा स्वसौख्यान्यखिलखलगणे
साम्यभावं च धृत्वा जित्वा जित्वाऽऽत्मशत्रून्
भुवनविजयजुट् लब्धिसूरिस्स जीयात् ॥३॥

शार्दूल०

गाम्भीर्यादिगुणैर्जितः सजलधिर्योऽद्यापि कृष्णायते
यस्योच्चैर्मुनिलक्ष्मणैरधरितो विन्ध्योपि नोत्तिष्ठति ।
वर्याद् विक्रमतोपितर्जिततमः कामोगतोऽनङ्गताम्
भव्योऽसौ भुवने जयी विजयतां श्रीलब्धिसूरीश्वरः
॥४॥

शार्दूल०

शास्त्राभ्यासरतामतामतिमतां शंकाविहीनाःश्रुते
स्त्रीणां संगमवर्जकाः प्रतिदिनं कल्याणकाराः सताम्।
शिष्यःश्लाध्यगुणैर्युताधृतियुता रक्षापराः प्राणिनां
वर्ण्याः स्युर्विजयाढ्यालब्धिपदपाः कृत्यैश्च सूरीश्वराः ॥५॥

स्रग्धरा०

मुक्त्वा मोहं महान्तं भवभयजनकं मन्मथादि प्रधानं
निर्गत्यात्मीयगेहाद् गुरुजन सविधे वित्तवंशादि हित्वा।
विद्यांहृद्यां गृहीत्वा मुनिजनसुमतोऽ जस्त्रमादाय दीक्षां
रक्ष्यात्पापात्सपायाद् भवभय भविनां यःसतां लब्धिसूरिः॥६॥

शार्दूल०

विद्वद्वन्द्यगुणः स्तुतश्च कविभिर्दीने दयालुर्भृशम्
शिष्यैश्शीलयुतैस्सुसाधुकरिभिस्सार्धं समोद्धारकः।
वन्द्यस्स्याद् भुविलब्धिसूरिकविजुट् सूरीश्वरश्शङ्करः
विश्वेषां शिवदो वरेण्यशरणः कल्याणरक्तः कविः ॥७॥

॥ उपरोक्तं पद्यं कविनामाङ्कितचक्रबन्धयुक्तं ॥

## चक्रबन्ध.



मालिनी०

सुकृतिततिमतानां जैनरत्नादिकानां
प्रथितपृथुपदानां धारका मारमाराः ।
जगति जरूजनानां बोधकास्तत्वबोधैः
भुवनविजयजुष्टा लब्धिसूरीश्वराःस्युः ॥८॥

---

द्वितीयं सूरीश्वराष्टकम् ।

आर्यावर्ते गरिष्ठे कुमतिकजनताऽऽ
रब्धधर्मप्रलोपे तत्पक्षं खण्डयन्तः
सदसि निजमतं स्थापयन्तः सुयुक्त्या ।
मुक्ताः क्रोधादिषट्कैं जगति बहुमताः
शासनं दीपयन्तः सुरीशा लब्धिसंज्ञाः
परहितनिरता ज्ञानवन्तो जयन्ति ॥१॥
राज्यश्रीर्यन्नृराजे त्रिदशपतिगुरौ
सत्तपःश्रीर्जयश्रीर्देवेन्द्रे कान्तिसुश्रीः
शशिनि च विधिना चक्रिरे देवपुर्याम् ।

एकत्रैकैवतानो भुवि हृदि तदिदा-
नीं विमृश्य स्वकीये श्रीलश्रीलब्धिसूरौ
नरवरमुकुटे निर्मितास्ताः समस्ताः ॥२॥

द्राक्षापाकं हसन्त्याऽमृतरससमतां
सम्भजन्त्या जयन्त्या भव्यात्मस्वान्तशङ्का-
ततिहतिकरणाऽत्यन्तदक्षीभवन्त्या ।
कामिन्या प्रौढयेवाऽखिलजनहृदयं
तत्क्षणं चाऽऽकृषन्त्या वाचा श्री लब्धिसूरिः
सदसि भवहरीं देशनां चर्करीति ॥३॥

यत्सेवा भक्तिभाजां जगति जनिजुषां
कल्पवल्लीव नूनं भुक्तिं मुक्तिं ददाति
श्रियमपि विपुलां सर्वतस्तन्तनीति ।
मुक्ताहारप्रकाशं त्रिभुवनमहितं
सद्यशो विस्तृणाति सानन्दं तं समीडे
कुशमुखमतिकं सद्गुरुं लब्धिसूरिम् ॥४॥

अज्ञानान्धदिवाकरः प्रविदुषामग्रेसरः श्रीधरः
साक्षाद्धर्मइवाऽपरः सुविदुषा दारिद्र्य चिन्ताहरः

नानावादिविजित्वरः प्रणमतामारोग्यसम्पत्करः
सर्वाऽऽत्तप्रचुराऽऽदरो विजयते श्रीलब्धिसूरीश्वरः ॥५॥

धर्माचार्यगरिष्ठतामुपगतेनैषा समस्ता धरा
स्वीयान्यन्मतकोयसर्वनिगमक्लिष्टार्थतास्फोटनम्।
कर्त्रा सद्विनयिप्रशिष्यनिकरैर्जोजुष्यमाणांऽघ्रिणा
ग्लावारात्रिरिवत्वयैव मतिमन्नाभाति मन्यामहे ॥६॥

विश्वख्यातयशस्करः सुमनसामापद्धरः सर्वैरः
सच्चारित्रविचारसुरः पदजुषां सद्बोधिबीजप्रदः।
दोनाऽनाथदयाकरः श्रुतिधरः सम्यक्त्वरत्नाकरो
धर्माराधनतत्परो विजयते श्री लब्धिसूरीश्वरः ॥७॥

संसारघोरविपिनान्तरलग्नराग
द्वेषादिदावपरिततजनाम्बुवर्षः।
जन्मोघवार्द्धितितरीषुदृढप्रपोतः
श्री लब्धिसूरिरवतादतिपीडितान्नः ॥८॥

प्राप्तिस्थानं

शा चंदुलाल जमनादास

जैन ज्ञानमंदिर

मु. छाणी–वाया वडोदरा.